VII. Of all Sanskrit authors Jagannátha was peculiarly subject to the jealousies and irritabilities of the scribbling race. Appadíkshita and Bhaṭṭojídíkshita, who were probably contemporaneous with him (*z*), appear to have been his great literary rivals. The former he has held up to the ridicule of the reading world in very strong language. In the *Rasagangádhara* he is denied the respect due to an adversary worthy of esteem, and his works are severely criticized and totally condemned. Jagannátha showers on him, in a half-sarcastic tone, such epithets as *áyúshmán, draviḍaśiromaṇi, draviḍapungava* and, in one place, takes a liberty at which any gentleman of good breeding would blush (*a*). No doubt, his

(*y*) See the opening stanza of the *Vivádabhangárṇava* where the author gives Rudra as his father's name.

(*z*) A *champú*, entitled नीलकंठविजय, written by a relative of Appadíkshita, gives 1637 A. C. as the date of its composition. The *Kavicharitra* gives Ayyádíkshita as the name of the author of this *champú*, and adds that he was Appadíkshita's nephew (p. 119), whereas the *Kávyamálá* states that it was composed by Nílakaṇṭha, who was grandson either to Appadíkshita himself or te his brother. As I have not seen the book I am not in a position to decide between the conflicting statements. But it seems to me that Jagannátha's invective against and personal abuse of Appadíkshita can be satisfactorily explained only on the ground of their contemporaneity; and in this light the statement of the *Kavicharitra* that the author was Appadíkshita's nephew appears more probable; for it is more natural to suppose that Appadíkshita and his nephew were both living in 1637 when the latter wrote his work. To Bhaṭṭojídíkshita's date I have not been able to get any clue.

(*a*) नेदं रूपकम्। रूपके च बिंबप्रतिबिंबभावो नास्तीति केनाप्यालंकारिकंमन्येन प्रतारितस्य दीर्घश्रवस उक्तिरश्रद्धेयैव।

Rúpakaprakaraṇa.

.....दीर्घश्रवसो लंबकर्णस्य द्रविडस्याप्पदीक्षितस्य।

Nágojí's *gloss* on the above.

Digitized by Google

criticism is often just, but he takes delight in employing unnecessarily severe language, and sometimes betrays unmistakable signs of malice (*b*). As to Bhattojídíkshita I am told that a commentator of the *Bháminíviláása* refers the second stanza of that poem to Jagannátha's rivalries with him. If a copy of the *Manoramákuchamardana* be discovered, I have no doubt that it will throw much light on the point.

His excessive egotism is another trait of character peculiar to Jagannátha. In some Sanskrit authors we find some self-laudatory sentences, but none has given so free and unreserved expression to his feeling of self-importance. Indeed, when we read the opening stanzas of the *Rasagangádhara* and the closing ones of the *Bháminíviláása* we recognize a voice that speaks from a full consciousness of its own worth, and we are almost ready to excuse the poet; but one cannot help thinking that such vaunts as his, rather indicate an indelicacy of feeling and an unbecoming love of self-praise.

As a poet Jagannátha takes a high rank, and may be classed with Kálidása, Bhavabhúti and other writers of celebrity. He is essentially a poet of emotions, and has achieved a high measure of success in his department. Though he belongs to the degenerate times of Sanskrit poetry, he is almost free from the affectation and extravagance of his age. In sweetness of melody and perspicuity of diction he stands on a level with Bilhaṇa and Jayadeva. *Prasáda*, as he himself tells us, is a special characteristic of his poetry (*c*). As a writer of prose and a controversialist Jagannátha, perhaps, stands second to none but the great Śankara. His prose is racy, vigorous, and characterized by the same perspicuity which pervades his poetry. He is thoroughly acquainted with the use of the

---

(*b*) See, for instance, the uncalled for discussion on the formation of पुरतः in the *Upamáprakaraṇa*.

(*c*) श्रुतमात्रा वाक्यार्थं करतलबदरमिव निवेदयंती घटना प्रसादस्य । अयं च सर्वसाधारणो गुणः । उदाहरणान्यत्र प्रायशो मदीयानि सर्वाण्येव पद्यानि ।

R. G., Anana I.

Digitized by Google

offensive and defensive weapons of controversy and wields them with admirable effect. The *Rasagangádhara* is full of highy argumentative passages which it is a treat to peruse.

VIII. In the foregoing pages I have tried to avoid theorising as far as possible. I know that an attempt may be made to spell out a biography of the author from several passages of the *Bháminíviláśa*; and I am also aware that many a theory may be based on some of the anecdotes given above and on the incomplete nature of the hitherto discovered Mss. of the *Rasagangádhara*; but I think that such theories are as likely to prove wrong as right and cannot be accepted without any corroborative testimony. The safest course is to wait for more facts.

Digitized by Google

Digitized by Google

अथ भामिनीविलासे

प्रास्ताविकविलासः ।

माधुर्यपरमसीमा सारस्वतजलधिमथनसंभूता।
पित्रतामनल्पसुखदा वसुधायां मम सुधाकविता ॥ १ ॥

निधाय हृदि विश्वेशं नत्वा विद्यागुरून् गुरून् ।
नानाग्रंथान् समालोच्य पाठभेदान् विविच्य च ॥ १ ॥
यः पंडितधुरीणेन जगन्नाथेन निर्मितः ।
श्रीभामिनीविलासाख्यः प्रबंधो भुवि विश्रुतः ॥ २ ॥
रसिकाल्हादजननं तं व्याख्यातुं यथामति ।
यते लक्ष्मणशर्माहं वैद्यवंशसमुद्भवः ॥ ३ ॥
त्यज्यते नात्र दुर्बोधं नानपेक्षितमुच्यते ।
काव्यमर्मप्रकाशाय परो यत्नो विधीयते ॥ ४ ॥
दृष्टं किमपि लोकेस्मिन्न दोषपरिवर्जितम् ।
तदत्र स्खलितं यत्तत्सहध्वं विबुधोत्तमाः ॥ ५ ॥

पंडितराजेन रसगंगाधरे

निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किंचित् ।
किं सेव्यते सुमनसां मनसापि गंधः
कस्तूरिकाजननशक्तिभृता मृगेण ॥

इति ग्रंथादौ कृतां प्रतिज्ञां परिपालयता ये सरसा नूतनाः श्लोका निर्मायोदाहरणतया निहिता अन्ये च ये स्फुटश्लोकाः प्रसंगवशाद्रचितास्तेषामन्यैरात्मकृतत्वख्यापनपरिहारायैकत्र संकलनेनेदं विलासचतुष्टयात्मकमुत्कृष्टं भामिनीविलासाख्यं काव्यं निबद्धमित्यस्यैव काव्यस्यान्तिमपद्यादनुमीयते । अस्य प्रास्ताविकाख्ये प्रथमे विलासे प्रायोऽन्योक्तय

1—Given in the appendix by B. and omitted by C, E, F.

Digitized by Google

दिगंते श्रूयंते मदमलिनगंडाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पांडित्यं प्रकटयतु कस्मिन् मृगपतिः ॥ २ ॥
पुरा सरसि मानसे विकचसारसालिस्खलत्-
परागसुरभीकृते पयसि यस्य यातं वयः।
स पल्वलजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥ ३ ॥

एवैकत्र संकलिताः । अस्य विलासस्यान्योक्तिविलास इति यन्नाम केषुचित्पुस्तकेषु दृश्यते तदप्येतन्मूलकमेवेति भाति । प्रास्ताविकविलास इति नाम त्वन्येषां सुभाषितश्लोकानामपीह सत्त्वादनुरूपतरम् । शृंगाराख्ये द्वितीये विलासे शृंगारप्रचुराणि करुणाख्ये तृतीये करुणरसप्रधानानि शांताख्ये चतुर्थे च शांतरसोद्बोधकानीह पद्यानि निबद्धानि । काव्यस्य भामिनीविलास इति संज्ञा भामिन्याः स्वभार्याया विलासमुद्दिश्य कृतेति तारानाथशर्मणामभिप्रायः । वस्तुतस्तु संज्ञाबीजं न निश्चयेन ज्ञायत इति वक्तव्यम् ।

(१) पिबतां पानं कुर्वताम् । पिबतामित्यनेनान्यथान्वयासंभवात् सुधाकवितेति विशेषणसमास एव ग्राह्यः ।

(२) इयमप्रस्तुतप्रशंसा यां जना अन्योक्तिं प्राहुः । अप्रस्तुतव्यवहारेण प्रस्तुतव्यवहारो यत्र वर्ण्यते साऽप्रस्तुतप्रशंसा। इयं पंचधा भवति । अप्रस्तुतेन प्रस्तुतं गम्यते यस्यामित्येका । कार्येण कारणमित्यपरा । कारणेन कार्यमिति तृतीया । सामान्येन विशेष इति चतुर्थी । विशेषेण सामान्यमिति पंचमी । अस्मिन् पद्ये स्ववृत्तांत एव कविना प्रस्तुतत्वेन विवक्षित इति वदंति । करटिनो दंतिनः । दिगंते श्रूयंत इत्यनेन तेषां पलायनं ध्वनितम् । कारुण्यास्पदत्वे स्त्रीत्वं हेतुः । असमशीला विषमस्वभावाः । तुच्छा इति यावत् । पांडित्यं विदारणरूपस्वकर्मकौशलम् ।

(३) सारसालिः कमलपंक्तिः । भेको मंडूकः । मरालो हंसः ।

Digitized by Google

तृष्णालोलविलोचने कलयति प्राचीं चकोरीगणे
मौनं मुंचति किं च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातःकिं नु विधौ विधातुमुचितो धाराधराडंबरः ॥ ४ ॥
अयि दलदरविंद स्यंदमानं मरंदं
तव किमपि लिहंतो मंजु गुंजंतु भृंगाः ।
दिशि दिशि निरपेक्षस्तावकीनं विदूण्वन्
परिमलमयमन्यो बांधवो गंधवाहः ॥ ५ ॥
समुपागतवति दैवादवहेलां कुटज मधुकरे मागाः ।
मकरंदतुंदिलानामरविंदानामयं महामान्यः ॥ ६ ॥
तावत्कोकिल विरसान् यापय दिवसान्वनांतरे निवसन् ।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ ७ ॥
कमलिनि मलिनीकरोषि चेतः

---

(४) कलयतीत्यादि सत्सप्तम्यंतम् । कलयति चंद्रिकापानार्थं स्वीकुर्वति । मौनं मुंचति संकोचं त्यजति । कैरवं चंद्रविकास्यः सितोत्पलजातिविशेषः । धुन्वति टंकारयति । मानः पुरुषकृतापराधप्रकाशकश्चेष्टाविशेषः । धाराधराडंबरो मेघाच्छादनम् ।

(५) दलदरविंद विकसितकमल । कमप्यनिर्वचनीयम् । अतिमधुरमित्यर्थः । अन्यस्त्वदीयरससेवनासक्तभ्रमरापेक्षया विलक्षणः । भ्रमराणां मकरंदलाभेन कृत्रिमबंधुत्वं भवेन्नाम । गंधवाहस्य तूपकारलाभाभावेनाकृत्रिमबंधुत्वमतिश्लाघ्यामिति भावः ।

(६) मकरंदतुंदिलानां पुष्परसपरिपूरितानाम् ।

(७) विरसान् स्वाभिमतप्रयोजनशून्यान् । कथमपि कालक्षेपं कुर्विति भावार्थः । मिलदलिमालः संप्राप्तभ्रमरसंघः । रसालश्चूतवृक्षः ।

(८) मलिनीकरोषि सखेदं करोषि । पारिणतः परिपक्वः । मार्मिका मर्म-

Digitized by Google

किमिति बकैरवहेलितानभिज्ञैः ।
परिणतमकरंदमार्मिकास्ते
जगति भवंतु चिरायुषो मिलिंदाः ॥ ८ ॥
नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ।
अत्यंतसरसहृदयो यतः परेषां गुणग्रहीतासि ॥ ९ ॥
येनामंदमरंदे दलदरविंदे दिनान्यनायिषत ।
कुटजे खलु तेनेहा तेने हा मधुकरेण कथम् ॥ १० ॥
अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः॥ ११॥
पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्तुम् ।
यत्पिंषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम्॥ १२॥
नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।

ज्ञाः । मिलिंदा भ्रमराः । येषां रसिकत्वमेव नास्ति तेषामवहेलनया न काप्ति हानिरतो न खेदः कार्यः । ये मार्मिकास्ते चिरायुषश्चेत् त्वया सर्व मेव प्राप्तमिति तात्पर्यार्थः ।

(९) नीचो निम्नो हीनश्च । सरसहृदयः सजलाभ्यंतरः सरसांतःकरणश्च । गुणः कलशाकर्षणरज्जुः कलाप्रावीण्यं च । श्लिष्टविशेषणेयमप्रस्तुतप्रशंसा ।

(१०) अमंदमरंदे परिपूर्णमकरंदे । हा तेन मधुकरेण कुटजे कथमीहा तेने इत्यन्वयः । ईहा स्पृहा । तेने चक्रे ।

(११) कस्य गिरां विषयोस्तु । न कस्यापीत्यर्थः । परिमलोद्गारैर्गंधविशेषप्रवाहैः । विषं वमतो सर्पानपि स्वगन्धेन तर्पयसीत्यहो ते महिमेत्यर्थः ।

(१२) पाटीर चंदन । परिपाटीं रीतिम् । उरीकर्तुं स्वीकर्तुम् । पिंषतां चूर्णयताम् । घर्षयतामिति यावत् । अस्य तात्पर्यार्थस्तु (११) पद्यस्येव ।

(१३) विवेके विवेचने । पृथक्करण इति यावत् । त्वमेवेत्येवकारेणेतरस्य-

Digitized by Google

विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥१३॥
उपरि करवालधाराकाराः क्रूरा भुजंगमपुंगवात् ।
अंतःसाक्षाद्द्राक्षादीक्षागुरवो जयंति केऽपि जनाः॥१४
स्वच्छंदं दलदरविंद ते मरंदं
विंदंतो विदधतु गुंजितं मिलिंदाः ।
आमोदानथ हरिदंतराणि नेतुं
नैवान्यो जगति समीरणात्प्रवीणः ॥ १५ ॥
याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गंता कं प्रति पांथसंततिरसौ संतापमालाकुला ।
एवं यस्य निरंतराधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः॥१६॥
आपेदिरेऽम्बरपथं परितः पतंगा
भृंगा रसालकुसुमानि समाश्रयंते ।
संकोचमंचति सरस्त्वयि दीनदीनो
मीनो नु हंत कतमां गतिमभ्युपैतु ॥ १७ ॥

विवेकित्वं नास्तीति सूच्यते। विश्वस्मिन् त्रैलोक्ये । कुलव्रतं तवेति शेषः ।

(१४) उपरि बहिः । करवालधाराकाराः खड्गधारावत्तीक्ष्णाः । भुजंगमपुंगवान्महाभुजंगमात् । द्राक्षाया दीक्षायाः शीतलत्वमाधुर्यादिरूपाया गुरव उपदेष्टारः । केप्यनिर्वचनीयमहिमानः। उल्लेखालंकारोयमुपमाव्यतिरेकाभ्यां तयोः समुच्चयेन च संकीर्णः ।

(१५) मिलिंदा भ्रमराः । हरिदंतराणि दिगंतराणि । अयं श्लोकः (९) पद्येन समानार्थकः ।

(१६) निदाघमिहिरो ग्रीष्मसूर्यः । गंता गमिष्यति । आधिर्मानसी व्यथा । जीवनं जीवितं जलं च ।

(१७) आपेदिरे पूर्वमेव गताः । पतंगाः पक्षिणः । रसाल आम्रः । सं-

Digitized by Google

मधुप इव मारुतेऽस्मिन् मा सौरभलोभमंबुजिनि मंस्थाः ।
लोकानामेव मुदे महितोऽप्यात्मामुनार्थितां नीतः॥ १८॥
गुंजाति मंजु मिलिंदे मा मालति मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहंति सुरतरवः ॥१९॥
यैस्त्वं गुणगणवानपि सतां द्विजिव्हैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीयमौन्नत्यम्॥२०॥
गाहितमखिलं गहनं परितो दृष्टाश्च विटपिनः सर्वे ।
सहकार न प्रपेदे मधुपेन भवत्समं जगति ॥ २१ ॥
अपनीतपरिमलांतरकथे पदं न्यस्य देवतरुकुसुमे ।
पुष्पांतरेऽपि गंतुं वांछसि चेत् भ्रमर धन्योऽसि॥ २२॥
तटिनि चिराय विचारय विंध्यभुवस्तव पवित्रायाः ।
शुष्यंत्या अपि युक्तं किं खलु रथ्योदकादानम् ॥२३
पत्रफलपुष्पलक्ष्म्या कदाप्यदृष्टं वृतं च खलु शूकैः ।

कोचमंचति शुष्कत्वं याति । दीनदीनोत्यंतदीनः ।
(१८) अंबुजिनि कमलिनि । महितः श्रेष्ठः । अर्थितां नीतो याचकतां प्रापितः । लघुत्वं स्वीकृतमिति यावत् । परोपकारायैवायं त्वां सौरभं याचते न लोभादित्यर्थः ।
(१९) मौनमप्रफुल्लीभावं मूकभावं च । वदान्यगुरवो दातृश्रेष्ठाः ।
(२०) द्विजिव्हैः सर्पैः । पिशुनैरिति च गम्यते । पटीरज चंदनतरो ।
(२१) गाहितं विचितम् । गहनं वनम् ।
(२२) अपनीता दूरीकृता परिमलांतरकथा येन तस्मिन् । धन्योसीत्युपालम्भः । पुष्पांतरं वांछसि चेद्धिक् त्वामिति भावः ।
(२३) विंध्यभुवो विन्ध्यपर्वतप्रसूताया अतएव पवित्रायाः ।
(२४) शूकैः कंटकैर्वृतं व्याप्तम् । बर्बुरो बाभळी इति प्रसिद्धो वृक्षः ।

21—Omitted in D. E. F.

Digitized by Google

उपसर्पेम भवंतं बर्बुर वद कस्य लोभेन ॥ २४ ॥
एकस्त्वं गहनेऽस्मिन् कोकिल न कलं कदाचिदपि कुर्याः।
साजात्यशंकयाऽमी न त्वां निघ्नंति निर्दयाः काकाः २५
तरुकुलसुषमापहरां जनयंतीं जगति जीवजातार्तिम् ।
केन गुणेन भवानीतात हिमानीमिमां वहसि ॥ २६॥
कलभ तवांतिकमागतमलिमेनं मा कदाप्यवज्ञासीः ।
अपि दानसुंदराणां द्विपधुर्याणामयं शिरोधार्यः ॥ २७॥
अमरतरुकुसुमसौरभसेवनसंपूर्णसकलकामस्य ।
पुष्पांतरसेवेयं भ्रमरस्य विडंबना महती ॥ २८ ॥
पृष्टाः खलु परपुष्टाः परिनो दृष्टाश्च विटपिनः सर्वे ।
माकंद न प्रपेदे मधुपेन तवोपमा जगति ॥ २९ ॥
तोयैरल्पैरपि करुणया भीमभानौ निदाघे
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारानपि विकिरता विश्वतो वारिदेन ॥ ३० ॥

---

(२९) कलं मधुरारावम् । साजात्यशंकया सजातीयोयमस्माकमिति धिया । कलं करोषि चेद् वैजात्यं ज्ञात्वा त्वामिमे हन्युरेवेत्यर्थः।
(२६) सुषमा शोभा । जीवजातार्तिं प्राणिसमूहपीडाम् । भवानीतात हिमालय । हिमानीं हिमसंहतिम् । न तवेदमुचितमिति भावः ।
(२७) कलभ गजाऽशो । द्विपधुर्या गजश्रेष्ठाः ।
(२८) इदं पद्यं (२२) पद्येन समानार्थकम् ।
(२९) परपुष्टाः कोकिलाः । इदं (२१) पद्येन समानार्थकम् ।
(३०) अल्पैस्तोयैरर्थात् कूपाद्युद्धृतैः । भीमो भानुर्यस्मिन् तस्मिन्निदाघे ग्रीष्मे । प्रावृषेण्येन वर्षाकालिकेन । विश्वतः सर्वतः ।

24—Omitted in A.

Digitized by Google

आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा
वात्याभिः परुषीकृता दश दिशश्चंडातपो दुःसहः ।
एवं धन्वनि चंपकस्य सकले संहारहेतावपि
त्वं सिंचन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा॥ ३१॥
न यत्र स्थेमानं दधुरतिभयभ्रांतनयना
गलद्दानोद्रेकभ्रमदलिकदंबाः करटिनः ।
लुठन्मुक्ताभारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिव शिव शिवानां कलकलः ॥ ३२ ॥
दधानः प्रेमाणं तरुषु समभावेन विपुलां
न मालाकारोऽसावकृत करुणां बालवकुले ।
अयं तु द्रागुद्यत्कुसुमनिकराणां परिमलै
र्दिगंतानातेने मधुपकुलझंकारभरितान् ॥ ३३ ॥
मूलं स्थूलमतीव बंधनदृढं शारवाः शतं मांसला
वासो दुर्गमहीधरे तरुपते कुत्रास्ति भीतिस्तव ।
एकः किं तु मनागयं जनयति स्वांते ममाधिज्वरं

---

(३१) वात्याभिर्वातसमूहैः । धन्वनि मरुभूमौ । अमृतेन जलेन ।

(३२) यत्र यस्मिन् द्वारे । स्थेमानं स्थिरत्वम् । गलद्दानं स्रवन्मदोदकं तस्योद्रेकोतिशयस्तेन भ्रमंतोलिकदंबा भ्रमरसंघा येषु तथाविधाः । हरेर्द्वारे शिवानां कलकलो भवतीत्यन्वयः । शिव शिवेति खेदे ।

(३३) तरुषु स्त्रीयेष्विति शेषः । बालवकुले विपुलां करुणां नाकृतेत्यन्वयः । द्राग् झटिति । उद्यतामुदयं प्राप्नुवतां कुसुमानां निकराः समूहास्तेषाम् । झंकारो गुंजारवः ।

(३४) शतमित्युपलक्षणम् । तेन बह्वच इत्यर्थः । मांसलाः पुष्टाः । दुर्गमहीधरे दुर्गमपर्वते । तव भीतिः कुत्रास्ति । यन्निमित्ता भीतिस्तन्न पश्याम

Digitized by Google

ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मरः॥३४॥
ग्रीष्मे भीष्मतरैः करैर्दिनकृता दग्धोऽपि यश्चातक
स्त्वां ध्यायन् घन वासरान् कथमपि द्राघीयसो नीतवान् ।
दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपा तत् कं प्रति ब्रूमहे ॥ ३५ ॥
दवदहनजटालज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ।
अयि जलधर शैलश्रेणिशृंगेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥३६॥
शृण्वन् पुरः परुषगर्जितमस्य हंत
रे पांथ विह्वलमना न मनागपि स्याः।
विश्वार्त्तिवारणसमर्पितजीवनोऽयं
नाकर्णितः किमु सखे भवतांबुवाहः ॥ ३७ ॥

इत्यर्थः । एकः केवलः । मनागीषत् । आधिज्वरं चिंतातापम् । ज्वालालीवलयीभवत् ज्वालामंडलरूप इत्यर्थः । घस्मरो भक्षकः ।

(३५) दिनकृता सूर्येण । द्राघीयसो दीर्घतरान् । करका वर्षोपलः ॥ कृपेति सोल्लुंठम् । तेन निर्दयत्वमित्यर्थः ।

(३६) जटालः संघीभूतः । ज्वालो ज्वाला । भूरुहाणां म्लायतां सतामित्यन्वयः । इयमनादरे षष्ठी । तेन म्लानीभवतो वृक्षाननादृत्येत्यर्थः । श्रीमदो जलसंपत्तिमदः । लक्ष्मीमद इत्यपि ध्वन्यते ।

(३७) विश्वार्तिवारणाय समर्पितं जीवनं येन तथाविधः । जीवनं जलं जीवितं च । भवतायं विश्वार्तिवारणसमर्पितजीवनो नाकर्णितः किमित्यन्वयः । अस्योपकृतय एव गर्जितत्वमिति भावः ।

Digitized by Google

सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं तु लोकोत्तरं
कीर्तिः किं च दिगंगनांगणगता किं त्वेतदेकं शृणु ।
सर्वानेव गुणानियं निगिरति श्रीखंड ते सुंदरा-
नुज्झंती खलु कोटरेषु गरलज्वालां द्विजिव्हावली॥३८॥
नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च संगतिः ।
तथापि हरते तापं लोकानामुन्नतो घनः॥ ३९ ॥
समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसति
निवासः पद्मायाः सुरहृदयहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितस्यांबुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥ ४० ॥
साकं ग्रावगणैर्लुठंति मणयस्तीरेऽर्कबिंबोपमा
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ।
एवं वीक्ष्य तवाविवेकमथ च प्रौढिं परामुन्नतेः
किं निंदान्यथवा स्तवानि कथय क्षीरार्णव त्वामहम्॥४१॥
किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते ।
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ४२॥

---

(३८) तु निश्चयेन । निगिरत्युद्गमति । लोपयतीति यावत् । श्रीखण्ड चंदन ।
(३९) अपेक्षा प्रत्युपकारादिवांछा । दाक्षिण्यमानुकूल्यम् । तथाप्य
पेक्षादितापहरणहेत्वभावेपि । उन्नत उच्चदेशस्थित उदारप्रकृतिश्च ।
(४०) हरिहस्ते विष्णुहस्ते सूर्यकरे वा । निवासो वासस्थानभूतत्वम् ।
ललितस्य मंडितस्य । द्विजोत्तंसे पक्षिश्रेष्ठे । ब्राह्मणवर इति च ध्वन्यते ।
अतीवोन्नतिः परं माहात्म्यम् ।
(४१) महांतोपि क्षीरार्णवमाश्रयंत इति तस्यौन्नत्यम् । स तु यथोचितोपचारं
न करोतीत्यविवेकिता ।
(४२) अभ्रायितेनाभ्रवन्नीलेन ।

Digitized by Google

इयत्यां संपत्तावपि च सलिलानां त्वमधुना
न तृष्णामार्त्तानां हरसि यदि कासार सहसा ।
निदाघे चंडांशौ किरति परितोऽगारनिकरं
कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥ ४३ ॥

अयि रोषमुरीकरोषि नो चेत्
किमपि त्वां प्रति वारिधे वदामः ।
जलदेन तवार्थिना विमुक्ता—
न्यपि तोयानि महान् न हा जहासि ॥ ४४ ॥

न वारयामो भवतीं विशंतीं वर्षानदि स्रोतसि जन्हुजायाः ।
न युक्तमेतत्तु पुरो यदस्यास्तरंगभंगान् प्रकटीकरोषि ॥४५॥

पौलोमीपतिकानने विलसतां गीर्वाणभूमीरुहां
येनाघ्रातसमुज्झितानि कुसुमान्याजघ्रिरे निर्जरैः ।
तस्मिन्नद्य मधुव्रते विधिवशान्माध्वीकमाकांक्षति
त्वं चेदंचसि लोभमंबुज तदा किं त्वां प्रति ब्रूमहे॥ ४६॥

---

(४३) कासार सरोवर । तां तृष्णाम् ।

(४४) अपिर्भिन्नक्रमः । तेन महानपीत्यन्वयः । हेति खेदे ।

(४५) जन्हुजाया भागीरथ्याः । यस्याश्रयणं कार्यं तेनैव सह विरोध-प्रकटनमत्यंतासमीचीनमिति भावः ।

(४६) पौलोमीपतिकानने नंदनवने । पौलोमींद्राणी । आघ्रातसमुज्झितान्यादावाघ्रातानि पश्चात् समुज्झितानि । येन मधुव्रतेन । अस्याघ्रातसमुज्झितानीत्येनेन संबंधः । गीर्वाणभूमीरुहां कल्पवृक्षाणाम् । मधुव्रतो भ्रमरः । विधिवशाद्दुर्दैववशात् । माध्वीकं मधु ।

Digitized by Google

भुक्ता मृणालपटली भवता निपीता—
न्यंबूनि यत्र नलितानि निषेवितानि ।
रे राजहंस वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ॥ ४७ ॥
प्रारंभे कुसुमाकरस्य परितो यस्योल्लसन्मंजरी—
पुंजे मंजुलगुंजितानि रचयंस्तानातनोरुत्सवान्।
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृशामंचति
त्वं चेन्मुंचसि चंचरीक विनयं नीचस्त्वदन्योऽस्ति कः॥४८॥
एणीगणेषु गुरुगर्वनिमीलिताक्षः
किं कृष्णसार खलु खेलसि काननेऽस्मिन् ।
सीमामिमां कलय भिन्नकरींद्रकुंभ—
मुक्तामयीं हरिविहारवसुंधरायाः ॥ ४९ ॥
जठरज्वलनज्वलताप्यपगतशंकं समागतापि पुरः ।
करिणामरिणा हरिणा हरिणाली हन्यतां नु कथम् ॥५०॥
येन भिन्नकरिकुंभविस्खलन्—
मौक्तिकावलिभिरंचिता मही ।

---

(४७) मृणालपटली मृणालसंघः ।

(४८) कुसुमाकरस्य वसंतस्य । ताननुभूतान् । चंचरीक भ्रमर । विनयः कृतज्ञताबुद्धिः । चतुर्थचरणेऽनुप्रासालंकारः ।

(४९) एणीगणेषु हरिणीसंघेषु ।

(५०) जठरज्वलनज्वलता जठराग्निना तप्यमानेन । क्षुधार्तेनेत्यर्थः । अपगतशंकं निःशंकम् । अनेनानायासप्राप्यता दर्शिता । द्वितीयार्धे यमकं स्पष्टमेव ।

(५१) अंचिता भूषिता । पराक्रमः स्वीय इति शेषः ।

Digitized by Google

अद्य तेन हरिणांतिके कथं
कथ्यतां नु हरिणा पराक्रमः ॥ ५१ ॥
स्थितिं नो रे दध्याः क्षणमपि मदांधेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि ।
असौ कुंभिभ्रांत्या खरनखरविद्रावितमहा—
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः ॥ ५२ ॥
गिरिगव्हरेषु गुरुगर्वगुंफितो
गजराजपोत न कदापि संचरेः ।
यदि बुध्यते हरिशिशुः स्तनंधयो
भविता करेणुपरिशेषिता मही ॥ ५३ ॥
निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुचाऽपि निदधे ।
इदं को जानीते यदयमिह कोणांतरगतो
जगज्जालं कर्ता कुसुमभरसौरभ्यभरितम् ॥ ५४ ॥

---

(५२) स्थितिं नो दध्या वासं मा कुरु । जटिलायां निम्नोन्नतायाम् । कुंभिभ्रांत्या गजोसाविति मत्वा । खरनखरैस्तीक्ष्णनखैर्विद्रावितो विदारितो महागुरुग्रावग्रामोत्यंतगुरुशिलापुंजो येन तथाविधः । यः करिबुद्ध्या शिलापुंजमपि विदारयति सत्वां विदारयेदिति निश्चय एवेति भावः ।

(५३) गुंफितो वेष्टितः । पूरित इति यावत् । पोतः शिशुः । स्तनंधयः स्तनपायी । भविता भविष्यति । करेणुः करिणी । हारीशिशुः सर्वोनेव करिणो हनिष्यति । केवलं करिण्य एवावध्यत्वादवशिष्टा भविष्यंतीति भावः ।

(५४) कर्ता करिष्यति । अस्मिन् मालाकारस्येतरवृक्षसाधारणी बुद्धिरनुचितैवेति भावः ।

Digitized by Google

यस्मिन् वेल्लति सर्वतः परिचलत्कल्लोलकोलाहलै
र्मंथाद्विभ्रमणभ्रमं ह्रदि हरिद्दंतावलाः पेदिरे ।
सोऽयं तुंगतिमिंगिलांगकवलीकारक्रियाकोविदः
क्रोडे क्रीडतु कस्य केलिकलहत्यक्तार्णवो राघवः॥ ५५॥
लूनं मत्तगजैः कियत् कियदपि छिन्नं तुषारार्दितैः
शिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम् ।
एषा कोणगता मुहुः परिमलैरामोदयंती दिशो
हा कष्टं ललिता लवंगलतिका दावाग्निना दह्यते ॥५६॥
स्वर्लोकस्य शिखामणिः सुरतरुग्रामस्य धामाद्भुतं
पौलोमीपुरुहूतयोः परिणतिः पुण्यावलीनामसि।
सत्यं नंदन किं लिदं सद्दयैर्नित्यं विधिः प्रार्थ्यते
त्वत्तः खांडवरंगतांडवनटो दूरेऽस्तु वैश्वानरः॥ ५७ ॥
स्वस्वव्याप्तिमग्नमानसतया मत्तो निवृत्ते जने
चंचूकोटिविपाटितारपुटो यास्याम्यहं पंजरात् ।
एवं कीरवरे मनोरथमयं पीयूषमास्वादय–
त्यंतः संप्रविवेश वारणकराकारः फणिग्रामणीः॥५८॥

---

(५५) वेल्लति चलति । कल्लोलो महानूर्मिः । हरिद्दंतावला दिग्गजाः । तिर्मिंगिलो मत्स्यभेदः । कवलीकारो गिलनम् । राघवो मत्स्यभेदः । द्वितीयार्धेऽनुप्रासः स्पष्ट एव ।

(५६) लूनं खंडितम् । तुषारार्दितैर्हिमपीडाभिः ।

(५७) पुरुहूत इंद्रः । सद्दयैर्विधिरिदं प्रार्थ्यत इत्यन्वयः । खांडवं कुरुक्षेत्रगतो वनविशेषः । अर्जुनेन खांडववनसमर्पणेन वह्निस्तार्पित इति प्रसिद्धमेव ।

(५८) मत्तो निवृत्ते मद्विषयचित्तवृत्तिमकुर्वाणे । अररपुटं कपाटपुटम् । अंतः पंजरमध्ये । वारणकराकारः करिशुंडादंडसदृशः । फणिग्रामणीः

Digitized by Google

रे चांचल्यजुषो मृगाः श्रितनगाः कल्लोलमालाकुला—
मेतामंबुधिकामिनीं व्यवसिताः संगाहितुं वा कथम् ।
अत्रैवोच्छलदंबुनिर्भरमहावर्त्तैः समावर्तितो
यद् ग्रावेव रसातलं पुनरसौ यातो गजग्रामणीः ॥५९॥
पिब स्तन्यं पोत त्वमिह मददंतावलधिया
दृगंतानाधत्से किमिति हरिदंतेषु परुषान् ।
त्रयाणां लोकानामपि ह्रदयतापं परिहर—
न्नयं धीरं धीरं ध्वनति नवनीलो जलधरः ॥ ६० ॥
धीरध्वनिभिरलं ते नीरद मे मासिको गर्भः ।
उन्मदवारणबुद्ध्या मध्येजठरं समुच्छलति ॥ ६१ ॥
वेतंडगंडकंडूति—पांडित्यपरिपंथिना ।
हरिणा हरिणालीषु कथ्यतां कः पराक्रमः ॥ ६२ ॥

सर्पश्रेष्ठः । अत्र विषादनालंकारोऽप्रस्तुतप्रशंसाघटकतया स्थितः । विषादनं चाभीष्टार्थविरुद्धलाभः ।

(५९) चांचल्यजुषश्चंचलाः । कल्लोला महांतस्तरंगाः । अंबुधिकामिनीं नदीम् । व्यवसिता उद्युक्ताः । वात्रावधारणे प्रश्नदृढीकरणे वा । उच्छलद्भिरुच्छलन्निर्भरो येषां तथाविधैर्महावर्तैर्महांभोभ्रमैः समावर्तित इतस्ततश्चलितः । ग्रावा पाषाणः । गाहमानो गजो यत्र शं नालभत तत्र भवतां का कल्याणकथेति भावः ।

(६०) स्तन्यं पयः । मददंतावलधिया मत्तवारणभ्रमेण ।

(६१) नीरद मेघ । उन्मदो मत्तः । मध्येजठरं जठरस्य मध्ये । पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । प्राचीनानां मतेऽसंबंधेपि संबंधरूपेयमतिशयोक्तिः । स च संबंधो वर्ण्योत्कर्षार्थः । यथास्मिन् पद्ये सिंहीवचने समुच्छलनासंबंधेपि समुच्छलनसंबंधोक्तिः शौर्यातिशायिका । नव्यास्तु नेमामतिशयोक्तिं मन्यंते ।

(६२) वेतंडो गजः । परिपंथी विरोधी । अस्य तात्पर्यार्थः(९१)पद्यस्येव।

Digitized by Google

नीरान्निर्मलतो जनिर्मधुरता बामामुखस्पर्धिनी
वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः ।
सर्वस्वं तदहो महाकविगिरां कामस्य चांभोरुह
त्वं चेत् प्रीतिमुरीकरोषि मधुपे तत्त्वां किमाचक्ष्महे ॥ ६३ ॥
लीलामुकुलितनयनं किं सुखशयनं समातनुषे ।
परिणामविषमहरिणा करिनायक वर्धते वैरम् ॥ ६४ ॥
विदुषां वदनाद्वाचः सहसा यांति नो बहिः ।
याताश्चेन्न परांचंति द्विरदानां रदा इव ॥ ६५ ॥
औदार्यं भुवनत्रयेऽपि विदितं संभूतिरंभोनिधे
र्वासो नंदनकानने परिमलो गीर्वाणचेतोहरः ।
एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः
स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥६६॥
एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिना-
मित्येवं परिचिंत्य मास्म मनसि व्याधानुतापं कृथाः ।

---

(६३) वामा ललना । महाकविगिरां कामस्य च सर्वस्वमित्यन्वयः । कवयस्त्वां वारंवारमुपमानतयांगीकुर्वंति कामस्य च त्वममोघमस्त्रमिति भावः । तदहो इत्युत्तरवाक्येनान्वीयते । यद्वा । तत् प्रसिद्धम् । मधुपे भ्रमरे । मद्यप इति च ध्वन्यते । आचक्ष्महे वयं तटस्था इति शेषः ।

(६४) लीलामुकुलितनयनमिति क्रियाविशेषणम् । समातनुषे करोषि । परिणामे विषमो दुःसहः ।

(६५) सहसाऽविमृश्य । परांचंति परावर्तंते ।

(६६) अर्थिप्रवराणां यदर्थितं याचितं तस्यार्पणविधौ । अविवेकेन सर्वेऽप्यन्ये गुणास्तथा न शोभंत इति भावः ।

(६७) अपवृणो निर्दयः । गूढाशया गुप्ताभिप्रायाः । त्वत्तुल्यकक्षा-

Digitized by Google

भूपानां भवनेषु किं च विमलक्षेत्रेषु गूढाशयाः
साधूनामरयो वसंति कति न त्वत्तुल्यकक्षाः खलाः॥६७॥
विश्वास्य मधुरवचनैः साधून् ये वंचयंति नम्रतमाः ।
तानपि दधासि मातः क श्यपि यातस्तवापि च विवेकः॥६८॥
अन्या जगद्धितमयी मनसः प्रवृत्ति
रन्यैव काऽपि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्यवद्या
विद्यावतां सकलमेव गिरां दवीयः ॥ ६९ ॥
आपद्गतः किल महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समंता-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥ ७० ॥
विश्वाभिरामगुणगौरवगुंफितानां
रोषोऽपि निर्मलधियां रमणीय एव ।
लोकंपृणैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुताऽपि नितांतरम्या॥ ७१ ॥

स्वत्समानावस्थाः । अत्रौपम्यप्रदर्शनस्य व्याधानुतापनाशः फलम् ।
(६८) काश्यपि पृथ्वि । क्षोणिर्ज्या काश्यपी क्षितिरित्यमरः ।
(६९) अन्या लोकोत्तरा । गिरां वाचां दवीयो दूरतरम् । अवर्णनीयमित्यर्थः । अतिशयोक्तिरियं प्राचीनानां मते । अतिशयश्चात्राभेदेपि भेदो लोकोत्तरत्वप्रतिपत्त्यर्थः । अस्मिन् पद्ये प्रवृत्त्यादीनामन्यत्वं वर्ण्यमानं लोकोत्तरत्वं प्रतिपादयति ।
(७०) महाशयानामुदारप्रकृतीनां चक्रवर्ती श्रेष्ठः । कालागुरुः कृष्णचंदनः । इयं प्रतिवस्तूपमा ।
(७१) लोकंपृणैर्लोकतर्पकैः । काश्मीरजस्य कुंकुमस्य । इयमपि प्रतिवस्तूपमा ।

Digitized by Google

लीलालुंठितशारदापुरमहासंपद्धराणां पुरो
विद्यासद्मविनिर्गलत्कणमुषो वल्गंति चेत् पामराः ।
अद्यश्वः फणिनां शकुंतशिशवो दंतावलानां शशाः
सिंहानां च सुखेन मूर्धसु पदं धास्यंति शालावृकाः ॥७२॥
गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यांति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसंति ॥ ७३ ॥
वहति विषधरान् पटीरजन्मा
शिरसि मसीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलंकं
पिशुनजनं खलु बिभ्रति क्षितींद्राः ॥ ७४ ॥

---

(७२) लीलया लुंठितः शारदापुरमहासंपद्धरो यैस्तेषाम् । महापंडितानामित्यर्थः । लीलालुंठितशारदापुरधियामस्माद्दशानां पुर इति रसगंगाधरे पाठः । तेनायं श्लोकः कविनात्मानमुद्दिश्य रचित इति भाति । विद्यासद्मनो विनिर्गलंतो ये कणास्तान् मुष्णंत्यपहरंति तथाविधाः । अल्पविद्या इत्यर्थः । वल्गंति कत्थंते । पामरा मूर्खाः । अद्यश्वोऽद्य वा श्वो वा । सुप्सुपेतिसमासः । समनंतरमेवेत्यर्थः । शालावृकाः श्वानः । शालावृकाः कपिक्रोष्टुश्वान इत्यमरः । अर्थापत्त्यलंकारोऽयम् । अर्थापत्तिश्च केनचिदर्थेन तुल्यन्यायत्वादर्थांतरस्यापत्तिः । महापंडितानामग्रेऽल्पविद्या वल्गंति चेत् तुल्यन्यायत्वाच्छकुंतपोताः फणिनां मूर्धसु पदं धास्यंतीत्यप्यायातमेव ।

(७३) शाणो रत्नपरिष्करणपाषाणः । जातु कदाचिदपि । वैधर्म्येणेयं प्रतिवस्तूपमा ।

(७४) पटीरजन्मा चंदनः । इयं मालाप्रतिवस्तूपमा । अत्र वहनाधानभजनभरणानां वस्तुत एकार्थतैव ।

Digitized by Google

सत्पूरुषः खलु हिताचरणैरमंद-
मानंदयत्यखिललोकमनुक्त एव ।
आराधितः कथय केन करैरुदारै-
रिंदुर्विकासयति कैरविणीकुलानि ॥ ७५ ॥
कृतमपि महोपकारं पय इव पीत्वा निरातंकः ।
प्रत्युत हंतुं यतते काकोदरसोदरः खलो जगति ॥ ७६ ॥
पांडित्यं परिहृत्य यस्य हि कृते बंदित्वमालंबितं
दुष्प्रापं मनसाऽपि यो गुरुतरैः क्लेशैः पदं प्रापितः ।
रूढस्तत्र स चेन्निगीर्य सकलां पूर्वोपकारावलिं
दुष्टः प्रत्यवतिष्ठते तदधुना कस्मै किमाचक्ष्महे ॥ ७७ ॥
खलः कापट्यदोषेण दूरेणैव विसृज्यते ।
अपायशंकिभिर्लोकैर्विषेणाशीविषो यथा ॥ ७८ ॥

---

(७५) अनुक्तोऽप्रार्थितः । स्वयमेवेत्यर्थः । उदारैर्महद्भिः । कैरविणी कुमुदिनी । अयं दृष्टांतालंकारः ।

(७६) निरातंको निःशंकः । काकोदरः सर्पः । सोदरः सहोदरः । सदृश इत्यर्थः । यथा सर्पः पयः पीत्वा दातारमेव दशति तथा खलोऽपि महोपकारं विस्मृत्योपकारिणं हंतुं यतत इति भावः ।

(७७) पांडित्यं परिहृत्य सदसद्विवेचनशक्तिरूपं विद्वत्त्वं त्यक्त्वा । बंदित्वमालंबितं स्तुतिपाठकत्वं स्वीकृतम् । यस्य हिताय सत्यासत्यमविगणय्य मिथ्यास्तुतिः कृतेति भावः । हिरत्र निश्चये विषादे वा । रूढः प्राप्तपदतया बद्धमूलः । प्रत्यवतिष्ठते परिपंथीभवति । दुष्टेषु कृत उपकारः परिणामे न सुखं जनयतीति तात्पर्यार्थः ।

(७८) आश्यां दंष्ट्रायां विषं यस्य स आशीविषः सर्पः । उपमेयम् । दूरतो विसर्जनमत्रानुगामी समानो धर्मः । कापट्यं विषं च दूरतो विसर्जने हेतुः ।

76, 77—omitted by E. F.
78—given in the appendix by B and omitted by C.E.F.

Digitized by Google

परार्थव्यासंगादुपजहदथ स्वार्थपरतां-
मभेदैकत्वं यो वहति गुणभूतेषु सततम् ।
स्वभावाद् यस्यांतः स्फुरति ललितोदात्तमहिमा
समर्थो यो नित्यं स जयतितरां कोऽपि पुरुषः ॥ ७९ ॥
वंशभवो गुणवानपि संगविशेषेण पूज्यते पुरुषः ।

---

(७९) इयं समासोक्तिः । अस्यां च लौकिके व्यवहारे वाच्ये शास्त्रीयव्यवहारस्यारोपः कृतः । य एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य यं इति भर्तृहरिप्रोक्तलक्षणोपेतः परोपकारव्यासक्त्या स्वार्थे तात्पर्यं त्यजति यः सदा स्वस्मादवरजनेष्वप्यभेदबुद्ध्यैकत्वं तादात्म्यं धारयति यस्यांतःकरणे स्वाभाविकमेव शोभनं सर्वोत्कृष्टं महत्त्वं विराजते यश्च सर्वसाधुकार्यनिर्वाहशक्तियुक्तः स कोपि सत्पुरुषो नित्यं सर्वोत्कर्षेण वर्तत इति लौकिकोऽर्थः । अस्मिन्नर्थे समर्थः पदविधिरिति पाणिनिसूत्रगतमहाभाष्यप्रतिपाद्यशास्त्रीयव्यवहारस्यारोपः । तत्र हि राजपुरुषेत्यादिसमासघटकपदानि शुद्धं स्वं स्वमर्थं विहाय राजाद्यर्थविशिष्टं पुरुषाद्यर्थं प्रतिपादयंत्यतस्तद्घटिततत्पुरुषसमासादिरपि विशिष्टार्थप्रतिपादक एव समासादिवृत्तौ विशिष्टशक्तेरेकार्थीभावरूपाया वैयाकरणैरभ्युपगमात् । तथा राजपुरुष इत्यादौ राज्ञः पुरुषो राज्ञोः पुरुषो राज्ञां पुरुष इत्येवं रूपेण विशेषणीभूतपूर्वपदार्थादौ संख्याविशेषस्य प्रतिपत्त्यभावेपि सामान्यरूपेणैकत्वसंख्याप्रतिपत्तिः । अस्याः संख्याया अभेदैकत्वसंख्येति पारिभाषिकं नाम शास्त्रकारैः कल्पितम् । किं चासमासे पदानां भिन्नभिन्नस्वरकत्वेपि समासे कृते समासस्वभावादेव समासस्येति सूत्रेण समासांत्योज्जदात्तो भवति । एवं वस्त्रं राज्ञः पुरुषश्चैत्रस्येत्यादावसमर्थानामनन्वितानां राजपुरुषादिपदानां समासवारणाय समर्थः पदविधिरिति सूत्रेण समर्थपदानामेव समासादिविधिर्बोधितः । एवं शास्त्रीयव्यवहारविषयीभूतस्य तत्पुरुषस्य लौकिकव्यवहारविषयीभूते सत्पुरुष आरोपः ।

(८०) वंशभवः सत्कुलप्रसूतो वेणुप्रभवश्च । गुणवान् विद्याविनयादि-

Digitized by Google

न हि तुंबीफलविकलो वीणादंडः प्रयाति माहिमानम्॥८०॥
अमितगुणोऽपि पदार्थो दोषेणैकेन निंदितो भवति ।
निखिलरसायनमहितो गंधेनोग्रेण लशुन इव॥ ८१॥
उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् ।
मूर्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥८२॥
वनांते खेलंती शशकशिशुमालोक्य चकिता
भुजप्रांतं भर्तुर्भजति भयहर्तुः सपदि या ।
अहो सेयं सीता दशवदननीता हलरदैः
परीता रक्षोभिः श्रयति विवशा कामपि दशाम् ॥८३॥
पुरो गीर्वाणानां निजभुजबलाहोपुरुषिका-
महो कारं कारं पुरभिदि शरं संमुखयतः ।

युक्तस्तंत्र्यादिगुणवांश्च । तुंबीफलं भोंपळा इति प्रसिद्धम् । वैधर्म्येणेयं प्रतिवस्तूपमा ।

(८१) निखिलेषु रसायनेषु महितो मान्यः । अयमुदाहरणालंकारः । अस्मिन्नलंकारे सामान्येन निरूपितस्यार्थस्य सुखप्रतिपत्तये तदेकदेशं निरूप्य तयोरवयवावयविभावः शब्देनोपादीयते । इवशब्दोऽत्रावयवावयविभावस्य वाचकः ।

(८२) मूर्च्छामृतिश्चवैद्यशास्त्रोक्तसंस्कारविशेषौ । निदर्शनमुदाहरणम् । अयमप्युदाहरणालंकारः ।

(८३) वनांते वनप्रदेशे । भर्तुं राघवस्य । हलरदैर्हलसदृशदंतैः । परीता व्याप्ता । विवशा पराधीना । अहो विधेर्बलीयस्त्वमिति भावः ।

(८४) गीर्वाणानां पुरो निजभुजबलाहोपुरुषिकां कारं कारं पुरभिदि शरं संमुखयतः स्मरस्य वपुर्भालानलभसितजालास्पदमभूदित्यन्वयः । अहं पुरुष इत्यहंकारवानहोपुरुषस्तद्भाव आहोपुरुषिका । आहोपुरुषिका दर्पाद् या स्यात् संभावनात्मनीत्यमरः । कारं कारमभीक्ष्णं कृत्वा । पुरभिदि शिवे । संमुखयतः संमुखं कुर्वतः । आभि-

Digitized by Google

स्मरस्य स्वर्बालानयनसुममालार्चनपदं
वपुः सद्यो भालानलभसितजालास्पदमभूत् ॥ ८४ ॥
युक्तं सभायां खलु मर्कटानां
शाखास्तरूणां मृदुलासनानि ।
सुभाषितं चीत्कृतिरातिथेयी
दंतैर्नखाग्रैश्च विपाटितानि ॥ ८५ ॥
किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतांधकारोत्करः ।
किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे
कः शत्रुर्वद खेददानकुशलो दुर्वासनासंचयः ॥ ८६ ॥
निष्णातोऽपि च वेदांते साधुत्वं नैति दुर्जनः ।

मुख्येन त्यजत इत्यर्थः । स्वर्बाला देवांगनाः । सुमं पुष्पम् । अर्चनपदं पूजास्थानम् । सद्यस्तत्कालमेव । भालानलस्य यद्भसितजालं भस्मसमूहस्तदास्पदम् । गुरुमहिमभूतेषु प्रयुक्तोऽपकारः स्वापकारायैव भवतीति भावः । अयं विषमालंकारः । परस्य दुःखसाधनानवाप्तिः स्वस्य दुःखांतरसाधनप्राप्तिश्चेत्युभयमत्रालंकारप्रयोजकम् ।

(८५) खल्वत्र वाक्यालंकारे । चीत्कृतिः सुभाषितं विपाटितान्यातिथेयीत्यन्वयः । आतिथेय्यतिथिसत्क्रिया । अयं समालंकारः ।

(८६) अच्छा निर्मला । द्वैतमंधकार इव तस्योत्करो राशिः । द्वैतं जीवपरमात्मभेदबुद्धिः । एतादृशं वेदांतदर्शनम् । तत्त्वावबोधोऽपरोक्षात्मानुभवः । प्रश्नपरिसंख्येयम् । परिसंख्या च सामान्यतः प्राप्तस्यार्थस्य कस्माच्चिद्दोषाद्व्यावृत्तिः । अत्र हरिपादभजनादिकमेव तीर्थादिकं नान्यदित्यर्थस्तात्पर्यमर्यादया प्रतीयते ।

(८७) वेदांते वेदांतशास्त्रजनितविचारे । मैनाकः पर्वतविशेषो हिमवतः पुत्रः । अस्य कथा प्रसिद्धैव । अयमवज्ञालंकारः । अन्यस्यान्यदीयगुणदोषप्रयुक्तगुणदोषाभानविरहोऽवज्ञा । यथास्मिन् पद्ये प्रथमार्धे

Digitized by Google

चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥ ८७ ॥
नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् ।
शाखिनोऽन्ये विराजंते खंड्यंते चंदनद्रुमाः ॥ ८८ ॥
परोपसर्पणानंतचिंतानलशिखाशतैः ।
अचुंबितांतःकरणाः साधु जीवंति पादपाः ॥ ८९ ॥
शून्येऽपि च गुणवत्तामातन्वानः स्वकीयगुणजालैः ।
विवराणि मुद्रयन् द्रागूर्णायुरिव सज्जनो जयति ॥ ९० ॥
खलः सज्जनकार्पासरक्षणैकहुताशनः ।
परदुःखाग्निशमनमारुतः केन वर्ण्यताम् ॥ ९१ ॥

प्रपंचानित्यत्वबोधकतारूपवेदांतशास्त्रगुणप्रयुक्तस्य खले वैराग्यरूपगुणाधानस्योत्तरार्धे च द्रवत्वरूपजलधिगुणप्रयुक्तस्य मैनाके मार्दवरूपगुणाधानस्य विरहो वर्णितः ।

(८८) साधीयः साधुतरम् । अन्ये शाखिनः पिचुमंदादयः । विराजंतेऽनभिभूताः शोभंते । अयं लेशालंकारोऽर्थांतरन्यासानुविद्धः । लेशश्च गुणस्यानिष्टसाधनतया दोषत्वेन दोषस्येष्टसाधनतया गुणत्वेन च वर्णनम् ।

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते ।
असंजातकिणस्कंधः सुखं स्वपिति गौर्गलिः ॥

इति कस्याचित्पद्यमेतत्समानार्थकमेव ।

(८९) अत्र पादपस्तुतिः सांसारिकजननिंदायां पर्यवस्यति ।

(९०) शून्येऽर्थरहिते स्थले शून्यहृदये जने च । गुणवत्तां तंतुमत्तां विनयादिगुणशालितां च । गुणजालैस्तंतुसमूहैर्दयादाक्षिण्यादिभिश्च । विवराणि शून्यभागान् पररंध्राणि च । मुद्रयन्नाच्छादयन् गोपयंश्च । ऊर्णायुः कोळी इति प्रसिद्धो जंतुभेदः । श्लिष्टोपमेयम् ।

(९१) इदं रूपकम् । अत्र रक्षणशमनपदे विरोधिलक्षणया विपरीतार्थबोधके ।

Digitized by Google

परगुह्यगुप्तिनिपुणं गुणमयमखिलैः समीहितं नितराम् ।
ललितांबरमिव सज्जनमाखव इव दूषयंति खलाः ॥ ९२ ॥
यशःसौरभ्यलशुनः शांतिशैत्यहुताशनः ।
कारुण्यकुसुमाकाशः खलः सज्जनदुःखदः ॥ ९३ ॥
धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथा वहति शीतभवां रुजं च ।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥ ९४ ॥
हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुंबिषति प्रकामम् ।
व्यालाधिपं च यतते परिरब्धुमद्धा
यो दुर्जनं वशयितुं तनुते मनीषाम् ॥ ९५ ॥
दीनानामिह परिहाय शुष्कशस्या-
न्यौदार्यं प्रकटयतो महीधरेषु ।

---

(९२) परगुह्यगुप्तिः परगुह्यांगाच्छादनं पररंध्रगोपनं च । गुणमयं तंतुमयं विनयादिगुणयुक्तं च । समीहितमपेक्ष्यमाणम् । ललितांबरं सुंदरवस्त्रम् । आखुर्मूषकः । श्लेषोत्थापितेयमुपमा ।

(९३) कारुण्यमेव कुसुमं तस्याकाशः शून्यभागः । अनाश्रय इति यावत् । अनेन खले कारुण्यस्यात्यंताभावः सूच्यते । एवमपरत्रापि । अस्य तात्पर्यं (९१) पद्यस्येव ।

(९४) घर्मव्यथां निदाघातपजनितपीडाम् ।

(९५) कालानलं प्रलयकालीनमग्निम् । अद्धा तत्वतः । वशयितुं वशीकर्तुम् । मनीषामिच्छाम् । मालानिदर्शनेयम् ।

(९६) दीनानां शुष्कशस्यानि परिहाय महीधरेष्वौदार्यं प्रकटयतः परममौन्नत्यमवाप्य दुर्मदस्य तावको विवेको ज्ञात इत्यन्वयः । दी-

Digitized by Google

औन्नत्यं परममवाप्य दुर्मदस्य
ज्ञातोऽयं जलधर तावको विवेकः ॥ ९६ ॥
गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदंडम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः ॥ ९७ ॥
व्योमनि बीजाकुरुते चित्रं निर्माति सुंदरं पवने ।
रचयति रेखाः सलिले यस्तु खले चरति सत्कारम् ॥ ९८ ॥
हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः ।
लोढि जिघ्रति सांक्षिप्य करोत्युन्नतमासनम् ॥ ९९ ॥
मालिनेऽपि रागपूर्णा विकासितवदनामनल्पजल्पेऽपि ।
त्वयि चपलेऽपि च सरसां भ्रमर कथं वा सरोजिनीं त्यजसि ॥
स्वार्थं धनानि धनिकात्प्रतिगृह्णतो य-
दास्यं भजेन्मालिनतां किमिदं विचित्रम् ।

नानामायाविहीनानाम् । इह योग्यभूमौ । औदार्यं जलवर्षणरूपम् । औन्नत्यमुच्चदेशस्थितिः । उच्चपदप्राप्तिरित्यपि ध्वन्यते । अत्यंतानुचितामिदमिति भावः ।

(९७) उर्वी पृथ्वी । महापुरुषाणां प्रलयकालेपि निर्विकारत्वमिति भावः । अयं सारालंकारः । स चोत्तरोत्तर उत्कर्षो भवेत् सारः परावधिरिति काव्यप्रकाशे लक्षितः ।

(९८) व्योमन्याकाशे । बीजाकुरुते बीजप्रक्षेपपूर्वकं कर्षणं कुरुते । कृञो द्वितीयतृतीयशंबबीजात्कृषाविति सूत्रेण कृञ्धातोर्योगे द्वितीयादिशब्देभ्यो डाज् भवति । तुरत्र निश्चये । निदर्शनेयम् ।

(९९) दत्तमर्पितम् । अज्ञेनानभिज्ञेन । हारं सांक्षिप्यैकीकृत्य तस्योन्नतमासनं करोतीत्यर्थः । अनभिज्ञेषु रमणीयवस्तुसमर्पणं तन्नाशाय भवतीति भावः ।

(१००) मलिने कृष्णवर्णे कपटवति च । रागस्ताम्रत्वमनुरागश्च । विकसितवदनां प्रफुल्लसरोजां सहासवदनां च । अनल्पजल्पे सततगुंजार-

Digitized by Google

गृह्णन् परार्थमपि वारिनिधेः पयोऽपि
मेघोऽयमेति सकलः किल कालिमानम् ॥ १०१ ॥
जनकः सानुविशेषो जातिः काष्ठं भुजंगमैः संगः ।
स्वगुणैरेव पटीरज यातोऽसि तथापि महिमानम्॥१०२॥
कस्मै हंत फलाय सज्जन गुणग्रामार्जने सज्जसि
स्वात्मोपस्करणाय चेन्मम वचः पथ्यं समाकर्णय ।
ये भावा हृदयं हरंति नितरां शोभाभरैः संभृता-
स्तैरेवास्य कलेः कलेवरपुषो दैनंदिनं वर्तनम् ॥ १०३॥
धूमायिता दश दिशो दलितारविंदा
देहं दहंति दहना इव गंधवाहाः ।
त्वामंतरेण मृदुताम्रदलाम्रमंजु-
गुंजन्मधुव्रत मधो किल कोकिलस्य ॥ १०४ ॥

वकारिणि बहु भाषमाणे च । चपलेऽस्थिरे चंचलचित्ते च । सरसां मधुयुक्तां प्रीतिमतीं च । अत्र भ्रमरवृत्तांतेन वाच्येन श्लिष्टविशेषणमाहात्म्यात् कामुकवृत्तांतः प्रतीयते । अलंकारः प्रकरणभेदात् समासोक्तिरप्रस्तुतप्रशंसा वा ।

(१०१) स्वार्थं स्वप्रयोजनसिद्धये । परार्थमपीत्यत्र न स्वकार्यसाधनायेत्यप्यर्थः । पयोऽपि न धनानीत्यर्थः । कालिमानं मालिन्यम् ।

(१०२) सानुविशेषो मलयः । गुणा एव गुणिषु पूजास्थानमित्यर्थः ।

(१०३) हंत खेदे । ग्रामः समूहः । स्वात्मोपस्करणायात्मानमलंकर्तुम् । भावा वस्तूनि । कलेवरपुषः शरीरपोषकस्य । इह रमणीयाः पदार्थाः कलेर्नित्यमदनीया इति वस्तुना मर्तुं कामयसे चेद् गुणग्राही यतस्त्वेति वस्तु व्यज्यते ।

(१०४) धूमायिता धूमपूर्णाः । त्वामंतरेण त्वां विना । मृदुताम्राणि दलानि येषां तेष्वाम्रेषु मंजु गुंजंतो मधुव्रता यस्मिन् । इदं मधुविशेषणम् ।

Digitized by Google

भिन्ना महागिरिशिलाः करजाग्रजाग्र-
दुद्दामशौर्यनिकरैः करटिभ्रमेण ।
दैवे पराचि करिणामरिणा तथापि
कुत्राऽपि नापि खलु हा पिशितस्य लेशः ॥१०५॥
गर्जितमाकर्ण्य मनागंके मातुर्निशार्धजातोऽपि ।
हरिशिशुरुत्पतितुं द्रागंगान्याकुंच्य लीयते निभृतम्॥१०६॥
किमहं वदामि खल दिव्यमते
गुणपक्षपातमभितो भवतः ।
गुणशालिनो निखिलसाधुजनान्
यदहर्निशं न खलु विस्मरसि ॥ १०७ ॥
रे खल तव खलु चरितं विदुषामग्रे विविच्य वक्ष्यामि ।

---

(१०५) करजाग्रेषु नखाग्रेषु जाग्रद् यदुद्दामशौर्य तस्य निकरैः । दैवे पराचि प्रतिकूले । करिणामरिणा हरिणा । नापि न प्राप्तः । पिशितस्य मांसस्य ।

(१०६) गर्जितं मेघस्येति शेषः । आकुंच्य संकुच्य । लीयते लिष्ठति । निभृतं निश्चलम् । हरिशिशोः शिशुत्वेऽप्येवंविध एव स्वभाव इति भावः ।

(१०७) दिव्यमतेऽलौकिकबुद्धे । खलविशेषणमेतत् । भवतो गुणपक्षपातं किं वदामीत्यन्वयः । अत्र गुणिनां सद्वस्मरणमापातत्रो गुणत्वेनोपात्तम् । इयं व्याजस्तुतिः । खलदुश्चरितोत्कीर्तनप्रस्ताव आमुखप्रतीता स्तुतिरत्र निंदायां पर्यवस्यति । खलः साधुजनान् यत्सततं स्मरति तद्रंध्रान्वेषणतत्परतया न हिताकांक्षया ।

(१०८) विविच्य निर्णीय । हतया दग्धया । अत्यंताप्रियये त्यर्थः । केषांचिन्मतेऽयमाक्षेपालंकारः । अत्र वक्ष्यमाणस्य खलवृत्तांतस्य निषेधः

107—Omitted in E. F.

Digitized by Google

अथवालं पापात्मन् कृतया कथयापि ते हतया ॥ १०८ ॥
आनंदमृगदावाग्निः शीलशारिवमदह्निपः ।
ज्ञानदीपमहावायुरयं खलसमागमः ॥ १०९ ॥
खलास्तु कुशलाः साधुहितप्रत्यूहकर्मणि ।
निपुणाः फणिनः प्राणानपहर्तुं निरागसाम् ॥ ११०
वदने विनिवेशिता भुजंगी
पिशुनानां रसनामिषेण धात्रा ।
अनया कथमन्यथावलीढा
न हि जीवंति जना मनागमंत्राः ॥ १११ ॥
कृतं त्वयोन्नतं कृत्यमर्जितं चामलं यशः ।
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः ॥ ११२ ॥
अविरतं परकार्यकृतां सतां
मधुरिमातिशयेन वचोऽमृतम् ।

कथ्यमानस्तस्यार्चितदुःखप्रदतां व्यनक्ति ।

(१०९) आनंदरूपमृगस्य दावाग्निः । नाशक इत्यर्थः । एवमपरत्रापि । रूपकमिदम् ।

(११०) प्रत्यूहकर्मणि प्रतिरोधक्रियायाम् । इयं प्रतिवस्तूपमा ।

(१११) रसनामिषेण जिव्हाच्छलेन । अमंत्रा गारुडादिमंत्ररहिताः । इयमपन्हुतिः ।

(११२) इयं कस्यचिदपकारिणं प्रत्युक्तिः । त्वया कृतेऽप्यपकारे परमखेदहेतौ मधुरमेव यो भाषे न परुषं तस्मिन्मयि पापमाचरतस्तव पापिष्ठत्वं कथं शक्यते वक्तुमिति व्यंग्यम् ।

(११३) मानसमंबुनिधिर्गांभीर्येण । यशश्चंद्रिका धवलत्वात् । शारदः

108—113—Omitted in E. F.

Digitized by Google

अपि च मानसमंबुनिधिर्यशो
विमलशारदचंदिरचंद्रिका ॥ ११३ ॥
एत्य कुसुमाकरो मे संजीवयिता गिरं चिरं मग्नाम् ।
इति चिंतयतो हृदये पिकस्य समधायि शौभिकेन शरः ११४
निर्गुणः शोभते नैव विपुलाडंबरोऽपि ना ।
आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा ॥ ११५ ॥
पंकैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥ ११६ ॥
तत्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकः को मरंदानामंतरेण मधुव्रतम् ॥ ११७ ॥
सरजस्कां पांडुवर्णां कंटकप्रकरांकिताम् ।
केतकीं सेवसे हंत कथं रोलंब निस्त्रपः ॥ ११८ ॥

शरत्कालीनः । चंदिरश्चंद्रः ।
(११४) कुसुमाकरो वसंतः । संजीवयिता पुनरुज्जीवयिता । शौभिकेन व्याधेन । अस्य तात्पर्यं (५८) श्लोकस्येव ।
(११५) विपुलाडंबरो विपुलोपकरणः । ना पुरुषः । आपातेनाविचारितबुद्ध्या रम्या या पुष्पश्रीस्तया शोभितः । वस्तुतस्तु न सा रम्येत्यर्थः । शाल्मलिः सांवरी इति प्रासिद्धो वृक्षः ।
(११६) विनोक्तिरियं तुल्ययोगितानुकूला ।
(११७) किमपि लोकोत्तरं । तत्त्वं मर्म ।
(११८) सरजस्कां पुष्परजोयुक्ताम् । रजस्वलामिति च ध्वन्यते । कंटकप्रकरांकितां कंटकसमूहचिताम् । पुलकितामिति च ध्वन्यते । रोलंब भ्रमर ।

114—Omitted in C. E. F.
115—118-Omitted in E. F.

Digitized by Google

यथा तानं विना रागो यथा मानं विना नृपः ।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥ ११९ ॥
संतः स्वतः प्रकाशंते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्याः शपथेनानुभाव्यते ॥ १२० ॥
अयि बत गुरुगर्वं मास्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यंतदीनं
स्वजनकममुनैव प्राणहीनं करोषि ॥ १२१ ॥
दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरंतनमघं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति
संगः सतां किमु न मंगलमातनोति ॥ १२२ ॥
अनवरतपरोपकारव्यग्रीभवदमलचेतसां महताम् ।

---

(११९) तान इतरस्वरधारणार्थः स्वरविशेषः । रंजकः स्वरसंदर्भो रागः । इयं विनोक्तिरुपमानुकूला ।

(१२०) नानुभाव्यते नानुभवं प्राप्यते । घ्राणेंद्रियेणैव साक्षाद् गृह्यत इत्यर्थः । प्रतिवस्तूपमेयम् ।

यदि संति गुणाः पुंसां विकसंत्येव ते स्वयम् ।
न हि कस्तूरिकामोदः शपथेन विभाव्यते ॥

इति कस्याचित् कवेः पद्यस्य रूपांतरमेवेदम् ।

(१२१) मौलिना श्रेष्ठेन । स्वजनकं कस्तूरीमृगम् । अत्र पूर्वोक्तलक्षणो लेशालंकारः ।

(१२२) चुलुकीकरोति पिबति । नाशयतीति यावत् ।

(१२३) कट्वेव काटवम् । स्वार्थे अण् । आपातेनाविचारितबुद्ध्या काट-

---

119—123—Omitted in E. F.

Digitized by Google

आपातकाटवानि स्फुरंति वचनानि भेषजानीव॥१२३॥

व्यागुंजन्मधुकरपुंजमंजुगीता-
माकर्ण्य स्तुतिमुदयन्नयातिरेकात् ।
आभूमीतलनतकंधराणि मन्ये-
ऽरण्येऽस्मिन्नवनिरुहां कुटुंबकानि ॥ १२४ ॥

मृतस्य लिप्सा कृपणस्य दित्सा
विमार्गगायाश्च रुचिः स्वकांते ।
सर्पस्य शांतिः कुटिलस्य मैत्री
विधातृसृष्टौ न हि दृष्टपूर्वा ॥ १२५ ॥

उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते ।
राजप्रियाः कैरविण्यो रमंते मधुपैः सह ॥ १२६ ॥

वानि कटूनि । यद्वा । आपातेन काटवं कटुत्वं येषां तानि । परिणामे परमसुखकराणीत्यर्थः ।

(१२४) उदयन्नुद्भवन् यो नयः शालीनता तस्यातिरेकादतिशयात् । अवनिरुहां वृक्षाणाम् । कुटुंबकानि कुलानि । इयं हेतूत्प्रेक्षा । अत्र नतकंधरत्व उदयन्नयातिरेकादिति हेतुरुत्प्रेक्षितो न वास्तवः ।

(१२५) मृतस्येति कर्मणि षष्ठी । लिप्सा लाभेच्छा । मृतलाभस्येच्छेत्यर्थः । कृपणस्येति कर्तरि षष्ठी । दित्सा दानेच्छा । विमार्गगा जारिणी । अत्र तुल्ययोगितालंकारः । मृतकृपणादीनां कस्यचित् प्रकृतत्वे तु दीपकं स्यात् ।

(१२६) राजप्रियाश्चंद्रप्रियाः । भूपप्रिया इत्यपि ध्वन्यते । मधुपैर्भ्रमरैः । मद्यपायिभिरित्यपि ध्वन्यते ।

124,125 & 127—Omitted in . E. F.
126—Omitted in A. E. F.

Digitized by Google

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चापि हरते विधिरुच्छृंखलो नृणाम् ॥ १२७ ॥
दोर्दंडद्वयकुंडलीकृतलसत्कोदंडचंडाशुग-
ध्वस्तोद्दंडविपक्षमंडलमथ त्वां वीक्ष्य मध्येरणम् ।
वल्गद्गांडिवमुक्तकांडवलयज्वालावलीतांडव-
भ्रश्यत्खांडवरुष्टपांडवमहो को न क्षितीशः स्मरेत् १२८ ॥
खंडितानेत्रकंजालिमंजुरंजनपंडिताः ।
मंडिताखिलदिक्प्रांताश्चंडांशोः पांतु भानवः ॥ १२९ ॥
इति श्रीपंडितराजजगन्नाथनिर्मिते भामिनीविलासे
प्रास्ताविकविलासः ।

---

(१२७) दैवाधीनं सर्वमिति भावः ।

(१२८) इयं कस्यचिद्राज्ञः स्तुतिः । त्वां मध्येरणं वीक्ष्य कः क्षितीशः पांडवं न स्मरेदित्यन्वयः । दोर्दंडद्वयेन कुंडलीकृतं यल्लसत् कोदंडं धनुस्तस्य चंडाशुगैस्तीक्ष्णबाणैर्ध्वस्तमुद्दंडविपक्षमंडलं प्रचंडशत्रुमंडलं येन तथाविधम् । मध्येरणमित्यव्ययीभावः । वल्गच्छद्धं कुर्वद् यद् गांडिवं तस्मान्मुक्तं यत्कांडवलयं शरचक्रं तस्य ज्वालावलीतांडवेन भ्रश्यन्नश्यद् यत् खांडवं नाम वनं तस्मिन् रुष्टं पांडवम् । अर्जुनमित्यर्थः । अत्र स्मरणालंकारः । अयं श्लोकः पंडितराजकृतप्राणाभरणकाव्येपि दृश्यते । किं तु तत्र ग्रंथपरिसमाप्त्यनंतरं स्थितोऽनुचित इवाभाति ।

(१२९) यस्याः परांगनागेहात् पतिः प्रातर्गृहेऽचति सा खंडिता । कंजालिः कमलपंक्तिः । चंडांशोः सूर्यस्य । भानवः कराः ।

इति भामिनीविलासव्याख्यायां काव्यमर्मप्रकाशाख्यायां
प्रास्ताविकविलासः ।

128—Omitted in A. D. E. F.

129—Omitted in E. F.

Digitized by Google

अथ भामिनीविलासे शृंगारविलासः

न मनागपि राहुरोषशंका
न कलंकानुगमो न पांडुभावः ।
उपचीयत एव कापि शोभा
परितो भामिनि ते मुखस्य नित्यम् ॥ १ ॥

नितरां परुषा सरोजमाला
न मृणालानि विचारपेशलानि ।
यदि कोमलता तवांगकाना-
मथ का नाम कथापि पल्लवानाम् ॥ २ ॥

---

(१) भामिनीवदनवर्णनमिदम् । अत्र व्यतिरेकालंकारध्वनिः । उपमानादुपमेयस्य गुणविशेषवत्त्वेनोत्कर्षो व्यतिरेकः । अत्र चोपमानस्य चंद्रस्य तद्विशेषणानां चोपादानमंतरेणैवोपमेयस्य मुखस्य चंद्रापेक्षयोत्कर्ष उपात्तैर्विशेषणैर्वस्तुस्थितिप्रकाशनेन कृतार्थैरप्याकूतविशेषेण प्राधान्येन व्यज्यत इति व्यतिरेकस्य ध्वनित्वम् । मुखस्य मनागपि न राहुरोषशंका चंद्रस्य तु सास्त्येव । एवमपरत्रापि । पांडुभावः पांडुत्वम् । उपचीयते वर्धते । भामिनी मानिनी । नित्यमित्यनेन चंद्रस्य शोभा सितपक्ष एव वर्धते न सर्वदेति ध्वनितम् ।

(२) भामिन्यंगवर्णनमिदम् । परुषा कठिना । विचारे पेशलानि रुचिराणि । अंगवन्मृणालानि न वेति विचारेऽपि समर्थानि नेत्यर्थः । यदि तवांगकानां कोमलता प्रस्तूयत इति शेषः । अंगकानामित्यत्र स्वार्थे कन् । अथ तर्हि । अत्र पल्लवादितिरस्कारेण नायिकांगानां सौकुमार्यातिशयो व्यज्यते ।

Digitized by Google

स्वेदांबुसांद्रकणशालिकपोलपाली-
दोलायितश्रवणकुंडलवंदनीया ।
आनंदमंकुरयति स्मरणेन काऽपि
रम्या दशा मनसि मे मदिरेक्षणायाः ॥ ३ ॥
कस्तूरिकातिलकमालि विधाय सायं
स्मेराननां सपदि शीलय सौधमौलिम् ।
प्रौढिं भजंतु कुमुदानि मुदामुदारा-
मुल्लासयंतु परितो हरितो मुखानि ॥ ४ ॥
तन्मंजु मंदहसितं श्वसितानि तानि
सा वै कलंकविधुरा मधुराननश्रीः ।
अद्यापि मे हृदयमुन्मदयंति हंत
सायंतनांबुजसहोदरलोचनायाः ॥ ५ ॥

---

(३) इयं नायिकामधिकृत्य नायकस्योक्तिः । स्वेदांबूनां ये सांद्राः कणास्तैः शालेते शोभेते एवंविधे ये कपोलपाली तयोर्दोलायिते चलिते ये श्रवणकुंडले ताभ्यां वंदनीया स्तुत्या नम्या च । अंकुरयति जनयति । मदिरे मदकारके ईक्षणे नेत्रे यस्यास्तथाविधाया नायिकायाः । प्रथमार्धगतविशेषणबलादियं सुरतावस्थेति ज्ञायते ।

(४) नायकस्य नायिकां प्रत्युक्तिः । आलि सखि स्मेराननां सस्मितवदनां सतीं सौधमौलिं शीलय सुधानिर्मितप्रासादोर्ध्वप्रदेशं भज । तेन च कुमुदानि मुदामुदारां प्रौढिं भजंतु हरितश्च स्वमुखान्युल्लासयंतु । उदारां महतीम् । मुदां प्रौढिं हर्षाणां वृद्धिम् । उल्लासयंतु विकासयंतु । लोकेभ्यो दर्शयंत्विति यावत् । अयं रूपकध्वनिः । अत्र कस्तूरिकातिलकविशिष्टं सस्मितं त्वदीयाननं कलंकचंद्रिकाविशिष्टचंद्राभिन्नमिति रूपकं कुमुदविकासादिना चंद्रोदयकार्येण ध्वन्यते ।

(५) नायकोक्तिरियम् । तत् पूर्वानुभूतम् । एवमपरत्रापि । वै निश्चयेन । कलंकविधुरा निष्कलंका । उन्मदयंत्युत्कटमदयुक्तं कुर्वंति । हंत खेदे ।

Digitized by Google

प्रातस्तरां प्रणमने विहिते गुरूणा-
माकर्ण्य वाचममलां भव पुत्रिणीति ।
नेदीयसि प्रियतमे परमप्रमोद-
पूर्णादरं दयितया दधिरे दृगंताः ॥ ६ ॥
गुरुजनभयमद्दिलोकनांतः-
समुदयदाकुलभावमावहंत्याः ।
दरदलदरविंदसुंदरं हा
हरिणदृशो नयनं न विस्मरामि ॥ ७ ॥
बदरामलकाम्रदाडिमाना-
मपदृत्य श्रियमुन्नतां क्रमेण ।

सायंतनांबुजसहोदरलोचनायाः संध्याकालीनकमलतुल्यनयनायाः । मुकुलितनेत्राया इति यावत् । भावध्वनिरयम् । पूर्वदृष्टाया नायिकायाः स्मृतिरत्र व्यंग्या ।

(६) प्रातस्तरां प्रणमने विहिते पुत्रिणी भवेति गुरूणां वाचमाकर्ण्य दयितया नेदीयसि प्रियतमे दृगंता दधिर इत्यन्वयः । गुरूणामिति काकाक्षिगोलकन्यायेन प्रणमन इत्यनेनाप्यन्वेति । प्रभाते गुरवो वंदनीया इति कुलवधूनामाचारः । गुरूणां श्वश्वादिजनानाम् । नेदीयस्यतिनिकटवर्तिनि । परमप्रमोदपूर्णादरमिति क्रियाविशेषणम् । अत्र दृगंताधानेन पुत्रिणी भवेत्याशिषाक्षिप्ता पुत्रप्राप्त्याशंसा सूचिता ।

(७) नायकोक्तिरियम् । गुरुजनाद् यद् भयं तेन यन्मद्विलोकनं मत्कर्मकमवेक्षणं तस्मिन्नंतर्मनसि समुदयन्नुत्पद्यमानो य आकुलभावो व्याकुलत्वं तमावहंत्याः । हा खेदे । अत्र विप्रलंभशृंगारः प्रधानम् । नयनस्यारविंदोपमा स्मृत्युपस्करणद्वारा तस्योपस्कारिका । गुरुजनभयप्रियविलोकनयोर्मध्ये व्याकुलत्वोदयेन नायिकागते त्रासौत्सुक्ये परस्पराभिभवकामे व्यज्येते ।

(८) नायकस्य नायिकां प्रत्युक्तिः । बदरं बदर्याः फलं बोर इति ख्या-

Digitized by Google

अधुना हरणे कुचौ यतेते
दयिते ते करिशावकुंभलक्ष्म्याः ॥ ८ ॥
जंबीरश्रियमतिलंघ्य लीलयैव
व्यानम्रीकृतकमनीयहेमकुंभौ ।
नीलांभोरुहनयनेऽधुना कुचौ ते
स्पर्धेते किल कनकाचलेन सार्धम् ॥ ९ ॥
कपोलपालिं तव तन्वि मन्ये
लावण्यधन्ये दिशमुत्तराख्याम् ।
विभाति यस्यां ललितालकायां
मनोहरा वै-श्रवणस्य लक्ष्मीः ॥ १० ॥
नीवीं नियम्य शिथिलामुषसि प्रकाश-
मालोक्य वारिजदृशः शयनं जिहासोः ।
नैवावरोहति कदाचन मानसान्मे
नाभेर्निभां सरसिजोदरसोदरायाः ॥ ११ ॥

तम् । आमलकमामलक्याः फलं आंवळा इति ख्यातम् । उन्नतामुत्कृष्टाम् । क्रमेणानुक्रमतः । अयं सारालंकारः ।

(९) जंबीरं ईडनिबूं इति प्रसिद्धम् । व्यानम्रीकृतौ जितौ कमनीयौ स्पृहणीयौ हेमकुंभौ याभ्यां तथाविधौ । स्पर्धेते परिभवेच्छां कुर्वाते । अयमपि सारालंकारः ।

(१०) तव कपोलपालिमुत्तराख्यां दिशं मन्य इत्यन्वयः । श्लेषोत्थापितेयमुत्प्रेक्षा । मन्य उत्प्रेक्षे । ललितालकायां ललितकेशवत्यां लालितालकावत्यां च । अलका नाम कुबेरपुरी । वै श्रवणस्य निश्चयेन कर्णस्य । (दिक्पक्षे) वैश्रवणस्य कुबेरस्य । लक्ष्मीः शोभा संपच्च ।

(११) नायकोक्तिरियम् । उषसि प्रकाशमालोक्य नीवीं नियम्य शयनं जिहासोर्वारिजदृशः सरसिजोदरसोदराया नाभेर्निभा मे मानसा-

Digitized by Google

आलीषु केलीरभसेन बाला
मुहुर्ममालापमुपालपंती ।
आरादुपाकर्ण्य गिरं मदीयां
सौदामिनीयां सुषमामयासीत् ॥ १२ ॥
मुधैव मंतुं परिकल्प्य गंतुं
मृषैव रोषादुपजल्पतो मे ।
उदश्रुचंचन्नयना नतांगी
गिरं न कां कामुररीचकार ॥ १३ ॥
तदवधि कुशली पुराणशास्त्र-
स्मृतिशतचारुविचारजो विवेकः ।
यदवधि न पदं दधाति चित्ते

ह्नावरोहतीत्यन्वयः । नीवीं वसनग्रंथिम् । वारिजदृशः कमलनेत्रायाः । जिहासोर्हातुमिच्छोः । सरसिजोदरसोदरायाः कमलोदरसदृशायाः । इदं नाभिविशेषणम् । नैवावरोहति नैवापयाति । तत्रैव व्याप्रियत इत्यर्थः ।

(१२) नायकोक्तिरियम् । केलीरभसेन क्रीडावेगेन। बाला नवोढा । उपालपत्यंनुकुर्वाणा । आरादूरत एव । सौदामिनीयां सुषमां विद्युतः शोभाम् । पत्या स्ववचनाकर्णनं विशंक्य त्रस्ता बाला झटित्यालापं त्यक्त्वाऽन्यत्र गतवतीत्यर्थः ।

(१३) गंतुं मुधैव मंतुं परिकल्प्य मृषैव रोषादुपजल्पतो मे नतांगी कां कां गिरं नोररीचकोरेत्यन्वयः । गंतुं गमनार्थम् । मुधैव मिथ्यैव । मंतुमपराधम् । उदश्रुचंचन्नयनोदिताश्रुपातयुक्तचपलनयना । उररीचकार स्वीचकार । तत्तदुक्त्वा नतांगी मामनुनेतुं प्रायततेति भावः ।

(१४) तदवधि तावत्पर्यंतम् । कुशली चेतासि स्वस्थानापन्नः । विवेकः

12—Omitted in C.

Digitized by Google

हरिणकिशोरदृशो दृशोर्विलासः ॥ १४ ॥
आगतः पतिरितीरितं जनैः
शृण्वती चकितमेत्य देहलीम् ।
कौमुदीव शिशिरीकरिष्यते
लोचने मम कदा मृगेक्षणा ॥ १५ ॥
अवधौ दिवसावसानकाले
भवनद्वारि विलोचने दधाना ।
अवलोक्य समागतं तदा मा-
मथ रामा विकसन्मुखी बभूव ॥ १६ ॥
वक्षोजाग्रं पाणिनाऽऽस्पृश्य दूरे
यातस्य द्रागाननाब्जं प्रियस्य ।
शोणाग्राभ्यां भामिनी लोचनाभ्यां
जोषं जोषं जोषमेवावतस्थे ॥ १७ ॥

कर्तव्याकर्तव्यज्ञानम् । दृशोर्नयनयोः । अहो कामिनीशृंगारचेष्टितस्य प्रभाव इति भावः ।

(१५) कस्यचित्पथिकस्याशंसावचनमिदम् । ईरितमुक्तम् । जनैः सखीजनैः । चकितं सविस्मयम् । देहलीं द्वारोपांतभागम् । अत्र शृण्वतीति शत्रा प्रत्यापितेन श्रवणसमकालमेव देहल्यागमनमित्यर्थेन प्रियायास्त्वरातिशयो गम्यते । स च तद्गतमौत्सुक्यातिशयं पुष्णाति ।

(१६) अवधौ प्रतिश्रुतवेलायाम् । तदाऽवधिकाले । अथावलोकनानंतरम् । हर्षानंतरमिति नागेशभट्टः । अत्र मुखविकासेन नायकागमनजन्यो नायिकागतो हर्षो व्यज्यते ।

(१७) दूरे यातस्य प्रियस्याननाब्जं जोषं जोषं भामिनी जोषमेवावतस्थ इत्यन्वयः । आस्पृश्यासमंतादीषद्वा स्पृष्ट्वा । शोणाग्राभ्यामारक्त-

Digitized by Google

गुरुभिः परिवेष्टितापि गंड-
स्थलकंडूयनचारुकैतवेन ।
दरदर्शितहेमबाहुनाला
मयि बाला नयनांचलं चकार ॥ १८ ॥
गुरुमध्यगता मया नतांगी
निहता नीरजकोरकेण मंदम् ।
दरकुंडलतांडवं नतभ्रू-
लतिकं मामवलोक्य घूर्णिताऽऽसीत् ॥ १९ ॥
विनये नयनारुणप्रसाराः
प्रणतौ हंत निरंतराश्रुधाराः ।
अयि जीवितसंशयः प्रयाणे

प्रांताभ्याम् । जोषं जोषं संसेव्य संसेव्य । निर्निमेषं दृष्ट्वा दृष्ट्वेत्यर्थः । जोषमेव तूष्णीमेव । इहाकस्मिकस्तनाग्रस्पर्शजन्यो प्रियागतोऽमर्षो नयनारुण्येन निर्निमेषनिरीक्षणेन च व्यज्यते ।

(१८) परिवेष्टितापि परिवेष्टितापि । कैतवेन मिषेण । नयनांचलं चकार कटाक्षेण दृष्टवती । अत्र कटाक्षवीक्षणेन प्रियागतोऽनुरागो व्यज्यते ।

(१९) नीरजकोरकेण कमलकलिकया । मंदमीषत् । दरेषत् कुंडलतांडवं यत्र तद्यथा तथा । नता भ्रूलतिका यस्मिन् कर्माणि तद्यथा तथा । घूर्णिता भ्रांतचित्ता । इह घूर्णितासीदित्यनेनासमीक्ष्यकारिन् किमिदमनुचितं कृतवानसीत्यर्थसंवलेतोऽमर्षो नायिकागतः प्राधान्येन व्यज्यते ।

(२०) मानवतीं प्रति नायकस्यानुनयोक्तिरियम् । विनये नमने । क्रियमाण इति शेषः । नयनारुणप्रसारा नयनयोरारुण्यस्य विस्ताराः कोपसूचकाः । अरुण आरुण्यम् । भावप्रधानो निर्देशः । प्रणतौ क्रिय-

Digitized by Google

न हि जाने हरिणाक्षि केन तुष्येः ॥ २० ॥
अकरुण मृषाभाषासिंधो विमुंच ममांचलं
तव परिचितः स्नेहः सम्यङ् मयेत्यभिधायिनीम् ।
अविरलगलद्बाष्पां तन्वीं निरस्तविभूषणां
क इह भवतीं भद्रे निद्रे विना विनिवेदयेत् ॥ २१ ॥
तीरे तरुण्या वदनं सहासं
नीरे सरोजं च मिलद्द्विकासम् ।
आलोक्य धावत्युभयत्र मुग्धा
मरंदलुब्धाऽलिकिशोरमाला ॥ २२ ॥
वीक्ष्य वक्षसि विपक्षकामिनी-

माणायामिति शेषः । हंत खेदे । जीवितसंशयो जीविष्यसि न वेत्याकारकः संशयः । प्रयाणे क्रियमाण इति शेषः । तुष्येः संतोषं प्राप्नुयाः ।

(२१) एषा प्रवासगतस्य स्वप्ने प्रियामेवंभाषिणीं दृष्टवतो निद्रां प्रति कस्यचिदुक्तिः । भद्रे निद्रे भवतीं विना क इहैवंविधां तन्वीं विनिवेदयेदित्यन्वयः । मृषाभाषासिंधो मिथ्याभाषिन् । इह प्रवासे । भद्रे कल्याणि । विनिवेदयेन्मदधीनां कुर्यात् । एवंभूतायाः प्रियतमावस्थाया निवेदनेन निद्रे मम भवत्या महानुपकारः कृत इति वस्तु विप्रलंभशृंगारश्चात्र प्रतीयते ।

(२२) तीरे सरस्या इति शेषः । मिलद्विकासं प्रकाशमानम् । मुग्धा मूढा । इदं सरोजमिदं वा सरोजमिति निश्चयशून्येत्यर्थः । अलिकिशोरमाला भ्रमरबालपंक्तिः । अयं ससंदेहालंकारः । अत्र पुरोवर्तिव्यक्तिद्वये कमलमिदमिदं वेति भ्रमरगतः संशयो व्यंग्यः । स च वदनकमलयोः सादृश्यातिशयं पुष्णाति ।

(२३) विपक्षकामिन्याः सपत्न्या हारलक्ष्म हारचिन्हम् । क्षणाद् वी-

---

22—Omitted in F.

Digitized by Google

हारलक्ष्म दयितस्य भामिनी ।
अंसदेशविनिवेशितां क्षणा-
दाचकर्ष निजबाहुवल्लरीम् ॥ २३ ॥
दरानमत्कंधरबंधमीष-
न्निमीलितस्निग्धविलोचनाब्जम् ।
अनल्पनिश्वासभरालसांगं
स्मरामि संगं चिरमंगनायाः ॥ २४ ॥
रोषावेशान्निर्गतं यामयुग्मा-
देत्य द्वारं कांचिदाख्यां गृणंतम् ।
मामाज्ञायैवाययौ कातराक्षी
मंदं मंदं मंदिरादिंदिरेव ॥ २५ ॥
त्वदये कृतशैवलानुषंगा
मुहुरंगानि यतस्ततः क्षिपंती ।

क्षणसमकालमेव । बाहुवल्लरीं बाहुलताम् । अत्र सपत्नीहारलक्ष्मदर्शनेन भामिन्या मनसि झटिति रोषः प्रादुर्भूत इति बाहुलताकर्षणेन ध्वन्यते ।

(२४) कस्यचित्कामिन उक्तिरियम् । संगं रतिसंगम् ।

(२५) रोषेण केलिमंदिरान्निर्गतस्य रोषनिर्वाहाक्षमतया च भूयोपि निवृत्तस्य कस्यचिदुक्तिरियम् । निर्गतं केलिगृहादिति शेषः । यामयुग्मात् प्रहरद्वयात् । प्रहरद्वये व्यतिक्रांत इत्यर्थः । द्वारमर्थात् केलिगृहस्य । कांचिदाख्यां किंचिदलीकं नाम । गृणंतं कथयंतम् । मामाज्ञायैव मां ज्ञात्वैव । कथितेप्यलीके नामन्ययं प्रिय एव आगत इति निश्चित्यैवेत्यर्थः । इंदिरेव लक्ष्मीरिव ।

(२६) विरहिणीदशावर्णनामिदम् । कृतशैवलानुषंगा स्थापितशैवला ।

Digitized by Google

प्रियनामपरे मुखे सखीना-
मतिदीनामियमादधाति दृष्टिम् ॥ २६ ॥
इत एव निजालयं गताया
वनिताया गुरुभिः समादृतायाः ।
परिवर्तितकंधरं नतभ्रु
स्मयमानं वदनांबुजं स्मरामि ॥ २७ ॥
कथय कथमिवाशा जायतां जीविते मे
मलयभुजगवांता वांति वाताः कृतांताः ।
अयमपि खलु गुंजन्मंजु माकंदमौलौ
चुलुकयति मदीयां चेतनां चंचरीकः ॥ २८ ॥
प्राणापहरणेनासि तुल्यो हालाहलेन मे ।
शशांक केन मुग्धेन सुधांशुरिति भाषितः ॥ २९ ॥
निरुध्य यांतीं तरसा कपोतीं
कूजत्कपोतस्य पुरो दधाने ।

अंनुषंगः संपर्कः । अत्र नायिकाया मनस्तापो व्यंग्यः ।
(२७) इत एवास्मादेव प्रदेशात् । स्मयमानं सस्मितम् ।
(२८) कस्याश्चिद्विरहिण्या उक्तिरियम् । वांता उद्गीर्णाः । मलय-भुजगवांता इत्यनेन वातानां विषसंपर्कः सूचितः । कृतांता यमाः । विरहिनाशकत्वाद् यमसदृशा इत्यर्थः । चुलुकयति पिबति । हरतीति यावत् । चंचरीको भ्रमरः ।
(२९) कस्यचिद् विरहिणश्चंद्रं प्रत्युक्तिः । भाषितोसीति शेषः ।
(३०) नायकोक्तिः । तरसा बलात्कारेण शीघ्रं वा । कूजत्कपोतस्य शब्दं कुर्वाणस्य पारावतस्य । स्मितार्द्रं सस्मितम् । सा नायिका । प्रि-

---

29—Omitted by C. E. F. & given in the appendix by B.

Digitized by Google

मयि स्मितार्द्रं वदनारविंदं
सा मंदमदं नमयांबभूव ॥ ३० ॥
तिमिरं हरंति हरितां पुरःस्थितं
तिरयंति तापमथ तापशालिनाम् ।
वदनत्विषस्तव चकोरलोचने
परिमुद्रयंति सरसीरुहश्रियः ॥ ३१ ॥
कुचकलशयुगांतर्मामकीनं नखांकं
सपुलकतनु मंदं मंदमालोकमाना ।
विनिहितवदनं मां वीक्ष्य बाला गवाक्षे
चकितनतनतांगी सद्म सद्यो विवेश ॥ ३२ ॥
विधाय सा मद्वदनानुकूलं
कपोलमूलं हृदये शयाना ।

यकर्तृकं कपोतस्याग्रे कपोत्याः समर्पणं दृष्ट्वा प्रिया व्रीडया वदनं नमयांचकारेति भावः ।

(३१) तिमिरमंधकारम् । पुरःस्थितमग्रे वर्तमानम् । तिरयंति दूरीकुर्वंति । वदनत्विषो मुखकांतयः । परिमुद्रयंत्याच्छादयंति । अयं रूपकध्वनिः । इह चंद्रोदयकार्याणि मुखकांतिभिरेव संपाद्यंत इत्यनेन मुखं चंद्र इति गम्यते ।

(३२) कुचकलशयुगांतः स्तनघटद्वंद्वमध्ये । सपुलकतान्विति क्रियाविशेषणम् । गवाक्षे विनिहितवदनं मां वीक्ष्येत्यन्वयः । विनिहितवदनं स्थापितमुखम् । चकितेत्यत्र द्वौ कर्मधारयौ । सद्म गृहम् । प्रियस्य नखक्षतमालोक्यमाना बाला तं गवाक्षे दृष्ट्वा व्रीडाकुला सद्यः सदनं प्रविवेशेति भावः ।

(३३) कपोलमूलं चिबुकम् । हृदय उरसि । तदानीं तस्मिन् काले । स्मृतिविषयभूते प्रसंग इति यावत् । बलारेरिंद्रस्य । अधरोच-

Digitized by Google

तन्वी तदानीमतुलां बलारेः
साम्राज्यलक्ष्मीमधरीचकार ॥ ३३ ॥
मुहुरार्थितयाद्य निद्रया मे
बत यामे चरमे निवेदिताया: ।
चिबुकं सुदृशः स्पृशामि याव-
म्मयि तावन्मिहिरोऽपि निर्दयोऽभूत् ॥ ३४ ॥
श्रुतिशतमपि भूयः शीलितं भारतं वा
विरचयति तथा नो हंत संतापशांतिम् ।
अपि सपदि यथायं केलिविश्रांतकांता-
वदनकमलवल्गत्कांतिसांद्रो नकारः ॥३५ ॥
लवलीं तव लीलया कपोले
कवलीकुर्वति कोमलत्विषा ।

कार निकृष्टां चकार । तया हृदये शयानयाऽहमिंद्रादप्यधिकं सुखमन्वभवमिति भावः ।

(३४) कस्यचित् प्रवासगतस्य स्वप्नेऽपि प्रियां द्रष्टुकामस्येयमुक्तिः । अर्थितया प्रार्थितया । बत खेदे । चरमे यामे चतुर्थप्रहरे । निवेदितायाः स्वप्नावस्थामुत्पाद्य दर्शितायाः । मिहिरः सूर्यः । स्वोदयेन मां विबोध्य प्रियावचनश्रवणोच्छ्वासनाशं कृत्वा सूर्योपि निर्दयदैवकृतविरहभाजो मे निर्दयः संपन्न इति भावः ।

(३५) भूयो वारंवारम् । शीलितं सम्यग्विचारितम् । हंत खेदे । केलिविश्रांतायाः सुरतक्रीडाजनितायासायाः कांताया वदनकमलाद् वल्गंत्या निर्यांत्या कांत्या सांद्रः पूरितः । नकारोऽपीत्यन्वयः । विधिप्रत्यायको हीकारः संतापशांतिं रचयेदिति किं वक्तव्यमित्यप्यर्थः।

(३६) तव कपोले लवलीं कवलीकुर्वति सतीत्यन्वयः । लवलीं लताविशेषम् । कवलीकुर्वति ग्रसमाने । अधरयतीति यावत् । त्विषा

Digitized by Google

परिपाडुरपुंडरीकखंडे
परिपेतुः परितो महाधयः ॥ ३६ ॥
यौवनोद्गमनितांतशंकिताः
शीलशौर्यबलकांतिलोभिताः ।
संकुचंति विकसंति राघवे
जानकीनयननीरजाश्रियः ॥ ३७ ॥
अधिरोप्य हरस्य हंत चापं
परितापं प्रशमय्य बांधवानाम् ।
परिणेष्यति वा न वा युवायं
निरपायं मिथिलाधिनाथपुत्रीम् ॥ ३८ ॥
भुजपंजरे गृहीता नवपरिणीता वरेण रहसि वधूः ।
तत्कालजालपतिता बालकुरंगीव वेपते नितराम् ॥ ३९

कांत्या । पुंडरीकखंडे कमलसमूहे । परितः सर्वतः । महाधयो महांति भयानि । अस्मानप्यवश्यमस्याः कपोलः कवलीकारिष्यतीति कमलानां भयम् ।

(३७) यौवनोद्गमस्तारुण्योपगमः । अर्थाद्दाशरथिगतः । शीलशौर्यबलकांतिभिर्लोभिताः संजातलोभाः । जानकीनयननीरजश्रियः सीतानेत्रकमलकांतयः । अत्र नेत्रयोः संकोचविकासाभ्यां जानकीगते व्रीडौत्सुक्ये परस्पराभिभवकामे व्यज्येते ।

(३८) भगवान् दाशरथिर्जानकीं परिणेष्यति वा न वेति संदिहानस्य मिथिलास्थजनस्योक्तिरियम् । अधिरोप्य सज्जीकृत्य । युवा तरुणः । अयं पुरोवर्ती । निरपायं निर्विघ्नम् । मिथिलाधिनाथपुत्रीं जनककन्याम् ।

(३९) नवपरिणीता नवोढा । जालमानायः । अत्र नववध्वा रतेर्मनागप्यस्पर्शादनुभवनिष्ठत्वेनाभासत्वं शृंगारस्य ।

Digitized by Google

उपनिषदः परिपीता गीतापि च हंत मतिपथं नीता ।
तदपि न हा विधुवदना मानससदनाद्बहिर्याति ॥ ४०
अकरुणद्वदय प्रियतम मुंचामि त्वामितःपरं नाहम् ।
इत्यालपति करांबुजमादायालीजनस्य विकला सा॥४१
लोभाद्दराटिकानां विक्रेतुं तक्रमानिशमटंत्या ।
लब्धो गोपकिशोर्या मध्येरथ्यं महेंद्रनीलमणिः ॥४२॥
रूपारुचिं निरसितुं रसयंत्या हरिमुखस्य लावण्यम् ।
सुद्दशः शिव शिव सकले जाता सकलेवरे जगत्यरुचिः॥४३

---

(४०) उपनिषदो वेदशिरोभागाः । परिपीताः सादरमाकर्णिताः । गीता भगवद्गीता । हंत खेदे । इयं विशेषोक्तिः । प्रसिद्धकारणकलापसामानाधिकरण्येन वर्ण्यमाना कार्यानुत्पत्तिर्विशेषोक्तिः । अत्रोपनिषदर्थविमर्शेन सकललोकानित्यत्वज्ञाने प्रसिद्धे विरतिहेतौ सत्यपि विरत्यनुत्पत्तिर्वर्णिता । विरत्यनुत्पत्त्या च रागाधिक्यं प्रतीयते ।

(४१) एषा प्रवासगतं स्वनायिकावृत्तांतं पृच्छंतं नायकं प्रति कस्याश्चित्संदेशहारिण्या उक्तिः । अत्रासंबद्धोक्त्या नायिकागतः प्रियविरहजन्मोन्मादः प्रतीयते ।

(४२) वराटिकानां लोभात् कपर्दिका लप्स्यंत इत्याशया । आनिशं निशावधि । अटंत्येतस्ततो गच्छंत्या । गोपकिशोर्या गोपालकन्यया । मध्येरथ्यं रथ्याया मध्ये । महेंद्रनीलमणिर्महार्घरत्नविशेषः । अत्र निगीर्याध्यवसानातिशयोक्त्या श्रीकृष्णोऽपि गृह्यते । वराटिकालाभार्थमटंत्या गोपकिशोर्या महेंद्रनीलमणिर्लब्ध इति वांछितार्थसिद्ध्यर्थं यत्ने क्रियमाणे ततोप्यधिकार्थलाभादयं प्रहर्षणालंकारः ।

(४३) रूपारुचिं रूपस्याप्रीतिम् । निरसितुं दूरीकर्तुम् । रसयंत्या आस्वादयंत्याः । हरिमुखस्य ब्रह्माभिन्नश्रीकृष्णमुखस्य । सुद्दशो नायिकायाः । सकलेवरे स्वशरीरसहिते । अरुचिर्वैराग्यरूपा । अयं स्वस्य दुःखसाधनानिवृत्त्या दुःखांतरसाधनावाप्त्या च विषमालंकारः । अत्र नायिकाया रूपारुचिं निरसितुमिच्छंत्या न केवलं रूपारुचिर्न

Digitized by Google

किं जल्पासि मुग्धतया हंत ममांगं सुवर्णवर्णमिति ।
तद्यदि पतति हुताशे तदा हताशे तुलां तवारोहेत् ॥४४

औत्सुक्यात्परिमिलतां त्रपया संकोचमंचतां च मुहुः ।
नवसंगमयोर्यूनोर्नयनानामुत्सवो जयति ॥ ४५ ॥

गरिमाणमर्पयित्वा लघिमानं कुचतटात्सरोजदृशाम् ।
स्वीकुर्वते नमस्ते यूनां धैर्याय निर्विवेकाय ॥ ४६ ॥

न्यंचति वयसि प्रथमे समुदंचति तरुणिमनि सुदृशः ।
दधति स्म मधुरिमाणं वाचो गतयश्च विभ्रमाश्च भृशम् ॥ ४७

दूरीभूता किं तु जगत्यपि वैराग्यलक्षणाऽरुचिरुत्पन्ना ।

(४४) नायिकां प्रति नायकोक्तिः । हंत हर्षे । तत् सुवर्णम् । हुताशे वह्नौ । हताशे स्वल्पाशे । अयं प्रतीपालंकारः । अत्र सुवर्णरूपस्य प्रसिद्धोपमानस्योपमेयीकरणादुपमेयस्योपमानीकृतस्य नायिकांगस्योत्कर्षो गम्यते । हुताशपातं विना प्रतीपमपि दुर्लभमुपमा तु स्वप्नेऽपि न संभवतीति मुग्धत्वहताशत्वाभ्यां गम्यते ।

(४५) संकोचमंचतामप्रसरणभावं प्राप्नवताम् । यूनोर्युवतिश्च युवा च तयोः ।

(४६) गरिमाणं गुरुत्वम् । श्रेष्ठत्वमित्यपि गम्यते । लघिमानं लघुत्वम् । नीचत्वामिति श्लिष्टोऽर्थः । सरोजदृशां कमलाक्षीणाम् । स्वीकुर्वते यूनां धैर्याय ते नम इत्यन्वयः । धैर्यस्य लघुगुरुविनिमयेन निर्विवेकत्वम् । अयं परिवृत्त्यलंकारः ।

(४७) न्यंचति निःशेषेण गच्छति सति । प्रथमे वयसि बाल्ये । समुदंचत्याविर्भवति सति । तरुणिमनि तारुण्ये । मधुरिमाणं माधुर्यम् ।

47—Omitted by D.

Digitized by Google

निस्सीमशोभासौभाग्यं नतांग्या नयनद्वयम् ।
अन्योन्यालोकनानंदविरहादिव चंचलम् ॥ ४८ ॥
गुरुमध्ये हरिणाक्षी मार्तिकशकलैर्निहंतुकामं माम् ।
रदयंत्रितरसनाग्रं तरलितनयनं निवारयांचक्रे ॥ ४९ ॥
नयनांचलावमर्शं न या कदाचित्पुरा सेहे ।
आलिंगितापि जोषं तस्थौ सा गंतुकेन दयितेन ॥ ५० ॥
मानपराग्वदनापि प्रिया शयानेव दयितकरकमले ।
उद्वेल्लद्भुजमलसग्रीवाबंधं कपोलमाधत्ते ॥ ५१ ॥
लोचनफुल्लांभोज–द्वयलोभांदोलितैकमनाः ।
कस्तूरीतिलकमिषादयमलिकेऽलिस्तवोल्लसति ॥ ५२ ॥

---

(४८) अन्योन्यालोकने य आनंदस्तस्य विरहादिव । इयं कामिनी-नयनद्वंद्वविषया हेतूत्प्रेक्षा । कामिनीनयनद्वंद्वं स्वभावत एव चंचल-मं । हेतुस्त्वत्रोत्प्रेक्षितः ।

(४९) गुरुमध्ये वृद्धस्त्रीजिनानां मध्ये । मार्तिकशकलैर्मृत्पिंडखंडैः । रदैर्यंत्रितं पीडितं रसनाग्रं यस्मिन् कर्मणि तथा । इयं स्वभावोक्तिः। अस्य पद्यस्य भावार्थो (१९) पद्यस्येव ।

(५०) नयनांचलावमर्शं कटाक्षविक्षेपम् । पुरा पूर्वम् । गंतुकेन देशां-तरं जिगमिषुणा । या वधूः पूर्वं कटाक्षविक्षेपमपि न सेहे सा प्रव-स्यत्पतिका प्रस्थानपूर्वरजन्यां दयितेनालिंगितापि तूष्णीं तस्था-विति भावः ।

(५१) मानपराग्वदना मानेन पराङ्मुखी । शयानेव निद्रां प्राप्तेव । निद्राव्याजेनेति यावत् । उद्वेल्लद्भुजमूर्ध्वीकृतबाहु यथा तथा ।

(५२) नायकस्य नायिकां प्रत्युक्तिः । लोचनरूपफुल्लांभोजद्वयेनां-दोलितं तरालितमेकं मनो यस्य सः । अलिके ललाटे । आलेर्भ्र-मरः । इयमपन्हुतिः । अत्र कस्तूरीतिलकस्य कस्तूरीतिलकत्वं निषिध्य तस्मिन् भ्रमरत्वमारोपितम् ।

Digitized by Google

अधिरजनि प्रियसविधे कथमपि संवेशिता गुरुभिः ।
किं भवितेति सशंकं पंकजनयना परामृशति ॥ ५३ ॥
चिंतामीलितमानसो मनसिजः सख्यो विहीनप्रभाः
प्राणेशः प्रणयाकुलः पुनरसावास्तां समस्ता कथा ।
एतत्त्वां विनिवेदयामि मम चेदुक्तिं हितां मन्यसे
मुग्धे मा कुरु मानमाननमिदं राकापतिर्जेष्यति ॥५४॥
अलंकर्तुं कर्णौ भृशमनुभवंत्या नवरुजं
ससीत्कारं तिर्यग्वलितवदनाया मृगदृशः ।

---

(५३) अधिरजनि रात्रौ । कथमपि महता प्रयासेन । संवेशिता शयनं प्रापिता । गुरुभिर्वृद्धस्त्रीजनैः । परामृशति चिंतयति । इयं मुग्धावस्था ।

(५४) मानिनीं प्रति कस्यचिदुक्तिः । चिंतामीलितमानसो चिंतया शून्यीकृतचेताः । विरतव्यापार इति यावत् । मनसिजो मदनः । त्वां जेतुमशक्नुवानः स चिंतां भजत इति भावः । विहीनप्रभाः स्वोक्त्यनाकर्णनेन हीनतेजस्काः । प्रणयाकुलः प्रेमव्याकुलः । प्रणतिपर इति यावत् । विनिवेदयामि कथयामि । हितां सुखदाम् । मानं न त्यजसि चेदिदमाननं राकापतिर्जेष्यति । पीडादानं मानमलीमसनायिकामुखसादृश्यस्य स्वस्मिन् संपादनं वा जयकारणम् ।

(५५) इयं कस्यचित्कामिनीकर्णभूषणं प्रत्युक्तिः । भृशमत्यंतम् । ससीत्कारमिति क्रियाविशेषणम् । अतिसुकृतसारान् महतः पुण्यस्य फलभूतान् । रसयत आस्वादयतः । जनुर्जन्म । सर्वश्लाघ्यं सकलैः स्तुत्यम् । ललितोत्तंस रम्यकर्णभूषण । अयं कामिन्या प्रथममेव केशेन कर्णे क्रियमाणस्योत्तंसस्य वृत्तांतः प्रत्यग्रखंडिताधरकामुकवृत्तांताभेदेन स्थितः । सा ह्याधरखंडनसमये नवरुजमनुभवति ससीत्कारं वदनं परावर्तयति कामुके च कराब्जं व्यापारयति। अत एवेयं समासोक्तिः । यत्र प्रस्तुतधर्मिको व्यवहारः साधारणवि-

Digitized by Google

कराब्जव्यापारानतिसुकृतसारान् रसयतो
जनुः सर्वश्लाघ्यं जयति ललितोत्तंस भवतः ॥ ५५ ॥
आयातैव निशा निशापतिकरैः कीर्णं दिशामंतरं
भामिन्यो भवनेषु भूषणगणैरंगान्यलंकुर्वते ।
मुग्धे मानमपाकरोषि न मनागद्यापि रोषेण ते
हा हा बालमृणालतोऽप्यतितरां तन्वी तनुस्ताम्यति॥५६॥
वाचो मांगलिकीः प्रयाणसमये जल्पत्यनल्पं जने
केलीमंदिरमारुतायनमुखे विन्यस्तवक्त्रांबुजा ।
निःश्वासग्लपिताधरं परिपतद्बाष्पार्द्रवक्षोरुहा
बाला लोलविलोचना शिव शिव प्राणेशमालोकते॥५७॥
यदवधि दयितो विलोचनाभ्यां
सहचरि दैववशेन दूरतोऽभूत् ।

षणमात्रोपस्थापिताप्रस्तुतधर्मिकव्यवहाराभेदेन भासते सा समासोक्तिः ।

(५६) मानिनीं प्रति सखीजनस्योक्तिः । निशाऽऽयातैव प्राप्तैव । मानापनोदे प्रतीक्ष्यमाण इयान् कालो व्यतीत इत्यर्थः । कीर्णं व्याप्तम् । अंतरमंतरालम् । भामिन्य इतरकामिन्यः । भवनेषु स्वस्वगृहेषु । अपाकरोषि त्यजसि । तन्वी कृशा ।

(५७) प्रवस्यत्पतिकावर्णनमिदम् । विप्रलंभशृंगारश्चात्र प्राधान्येन व्यंग्यः । मांगलिकीर्मंगलफलकाः । प्रयाणसमये पत्युरिति शेषः । जने भवनस्थे सुहृज्जने । मारुतायनमुखे गवाक्षविवरे । निःश्वासैर्ग्लपितो ग्लापितोऽधरो यस्मिन् कर्मणि तथा । शिव शिवेति खेदातिशये ।

(५८) कस्याश्चिद्विरहिण्याः सखीं प्रत्युक्तिरियम् । सहचरि सखि । दूरतो दूरे । शिथिलीकृतो मंदीकृतः । अथशब्दोऽत्र साकल्ये । करणैरिंद्रियैः । प्रणयः स्नेहः । निजक्रियासु स्वकर्तव्येषु । अत्र नायिका-

Digitized by Google

तदवधि शिथिलीकृतो मदीयै-
रथ करणैः प्रणयो निजक्रियासु ॥ ५८ ॥
निखिलां रजनीं प्रियेण दूरा-
दुपयातेन विबोधिता कथाभिः ।
अधिकं न हि पारयामि वक्तुं
सखि मा जल्प तवायसी रसज्ञा ॥ ५९ ॥
निपतद्बाष्पसंरोधमुक्तचांचल्यतारकम् ।
कदा नयननीलाब्जमालोकेय मृगीदृशः ॥ ६० ॥
यदि लक्ष्मण सा मृगेक्षणा
न मदीक्षासरणिं समेष्यति ।
अमुना जडजीवितेन मे
जगता वा विफलेन किं फलम् ॥ ६१ ॥

गता जडता व्यंग्या । जडता च विरहादिजन्याऽवश्यकर्तव्याप्रतिसंधानविकला चित्तवृत्तिः ।

(५९) एषा प्रियागमनद्वितीयदिवसे मुहुर्निशावृत्तांतं पृच्छंतीं सखीं प्रति रजनिजागरणजनितालस्यायाः कस्याश्चिदुक्तिः । निखिलां रजनीं विबोधिताऽहं वक्तुं न पारयामीत्यन्वयः । रजनीमित्यत्र कालाध्वनोरत्यंतसंयोग इति द्वितीया । न हि नैव । पारयामि शक्नोमि । आयसी लोहमयी । रसज्ञा जिह्वा ।

(६०) कस्यचित् पूर्वदृष्टकामिनीदर्शनोत्सुकस्योक्तिरियम् । निपतद्बाष्पसंरोधेन गलदश्रुजलावरोधेन मुक्तचांचल्या तारका यस्य तत् । आलोकेय पश्येयम् ।

(६१) दंडकायां वैदेहीविरहव्यथाविकलितस्य भगवतो रामस्योक्तिरियम् । सा सीता । मदीक्षासरणिं मन्नेत्रपथम् । जडजीवितेनाचेतनजीवितेन । विफलेन विरुद्धफलेन । अत्र रामगतो निराशाजन्यो निर्वेदो व्यंग्यः ।

58—61—Omitted in C, E, F.

Digitized by Google

भवनं करुणावती विशंती
गमनाज्ञालवलाभलालसेषु ।
तरुणेषु विलोचनाब्जमाला-
मथ बाला पथि पातयांबभूव ॥ ६२ ॥
पापं हंत मया हतेन विहितं सीताऽपि यद्यापिता
सा मामिंदुमुखी विना वत वने किं जीवितं धास्यति ।
आलोकेय कथं मुखं सुकृतिनां किं ते वदिष्यंति मां
राज्यं यातु रसातलं पुनरिदं न प्राणितुं कामये ॥ ६३ ॥
उषसि प्रतिपक्षकामिनी-
सदनादंतिकमंचति प्रिये ।

---

(६२) भवनं स्वगृहम् । करुणावती परिश्रमस्मरणेन तरुणेषु संजातकरुणा । कुतश्चिदागच्छंत्या पथि तदीयरूपयौवनगृहीतमानसैर्युवभिरनुगम्यमानया कयाचिद्भवनप्रवेशसमये निजसेवासार्थक्यांगीकाराय गमनाज्ञापनरूपलाभलालसेषु तरुणेषु गमनाज्ञादानसूचिका नयनकमलमाला परिचिक्षिप इत्यर्थः । अत्र बहुवचनेन बालागताऽनेकतरुणविषया रतिर्गम्यते । अत एवायं शृंगाराभासः ।

(६३) इयं कठोरगर्भा जानकी वने त्यक्तवतो भगवतो रामस्योक्तिः । अत्र भावानां मत्यसूयाविषादस्मृतिवितर्कव्रीडाशंकानिर्वेदानां व्यामिश्रणं चमत्कारकारि । तत्र पापमित्यनेन मतिर्हंतेत्यादिनाऽसूया सीतापीत्यादिना विषादः सेत्यनेन स्मृतिर्मामित्यादिना वितर्क आलोकेयेत्यादिना व्रीडा किं त इत्यादिना शंका राज्यमित्यादिना च निर्वेदो व्यज्यते । हंत खेदे । यापिता निर्वासिता । मां विनेत्यन्वयः । इदं राज्यमित्यन्वयः ।

(६४) प्रतिपक्षकामिनी सपत्नी । अंचति गच्छति । अरुणद्युतिरा-

62—63—Omitted in C, E, F.

Digitized by Google

सुदृशो नयनाञ्जकोणयो-
रुदेयाय त्वरयाऽरुणद्युतिः ॥ ६४ ॥
क्षमापणैकपदयोः पदयोः पतति प्रिये ।
शेमुः सरोजनयनानयनारुणकांतयः ॥ ६५ ॥
निर्वासयंतीं धृतिमंगनानां
शोभां हरेरेणदृशो धयंत्याः ।
चिरापराधस्मृतिमांसलोऽपि
रोषः क्षणप्राघुणिको बभूव ॥ ६६ ॥
राज्ञो मत्प्रतिकूलान्मे महद्भयमुपस्थितम् ।
बाले वारय पांथस्य वासदानविधानतः ॥ ६७ ॥

रुण्यम् । अत्र नेत्रयोरारुण्योदयेन नायिकायां रोषोदयो व्यज्यते ।

(६५) क्षमापणस्यैकपदयोर्मुख्यस्थानभूतयोः । पततीति सम्पन्न्यंतम् । अत्र नायिकायां रोषशांतिर्व्यंग्या ।

(६६) निर्वासयंतीं दूरीकुर्वंतीम् । धृतिं धैर्यम् । माननिर्वहणक्षमत्वमिति यावत् । एणदृशो हरिणनयनायाः । धयंत्या आस्वादयंत्याः । मांसलः पुष्टः । क्षणप्राघुणिकोऽचिरस्थाय्यभ्यागतः । गमनोन्मुख इति यावत् ।

(६७) कस्यचित्पांथस्य कांचित्तरुणीं प्रत्युक्तिः । बाले मत्प्रतिकूलाद्राज्ञ उपस्थितं पांथस्य मे महद्भयं वासदानविधानतो वारयेत्यन्वयः । राज्ञो नृपाच्चंद्राच्च । वासस्य यद्दानं तस्य विधानतः । वसत्यर्थं स्थलदानेनेत्यर्थः । अत्रोपभोगं देहीति वस्तु राजपदात्प्रतीयते । राजपदाद् व्यंजनावृत्त्या चंद्रोपस्थितौ हि चंद्रजनितभयवारणकारणत्वेनोपभोगस्याभिव्यक्तिः ।

64—67—Omitted in C, E, F.

Digitized by Google

मलयानिलमनलयिति मणिभवने काननीयति क्षणतः ।
विरहेण विकलहृदया निर्जलमीनायते महिला ॥ ६८ ॥
कालागुरुद्रवं सा हालाहलवह्निनानती नितराम् ।
अपि नीलोत्पलमालां बाला व्यालावलिं किलामनुत ॥ ६९ ॥
विधिवंचितया मया न यातं
सखि संकेतनिकेतनं प्रियस्य ।
अधुना बत किं विधातुकामो
मयि कामो नृपतिः पुनर्न जाने ॥ ७० ॥
विरहेण विकलहृदया विलपंती दयित दयितेति ।
आगतमपि तं सविधे परिचयहीनेव वीक्षते बाला ॥ ७१ ॥

---

(६८) विरहिण्यवस्थावर्णनम् । अनलीयत्यनलमिवाचरति । उपमानादाचार इति सूत्रेणानलशब्दात् क्यच् । मणिभवने रत्ननिर्मितप्रासादे । काननीयतीत्यत्राधिकरणाच्चेति वार्तिकेन काननशब्दात् क्यच् । निर्जलमीनायते निर्जलस्थलस्थमीन इव व्याकुला भवति । निर्जलमीनशब्दात्कर्तुः क्यङ् सलोपश्चेति क्यङ् । महिला कामिनी ।

(६९) विरहिणीमधिकृत्य कस्यचिदुक्तिः । कालागुरुद्रवं कृष्णचंदनरसम् । विजानती मन्यमाना । व्यालावलिं सर्पश्रेणीम् । अमनुतामन्यत ।

(७०) संकेतस्थानाऽगमनेन शंकिताया नायिकायाः सखीं प्रत्युक्तिः । विधिर्दैवम् । निकेतनं स्थानम् । कामो नृपतिः कामरूपो राजा । शासनलंघनेन कृतापराधायां मयि कामनृपतिः किमाचरिष्यतीति न जान इति भावः ।

(७१) तं दयितम् । अत्र नायिकागतो मोहो व्यंग्यः ।

68—70—Omitted in C, E, F.
71—Omitted in D.

Digitized by Google

दारिद्र्यं भजते कलानिधिरयं राकाऽधुना म्लायति
स्वैरं क्वैरवकाननेषु परितो मालिन्यमुन्मीलति।
द्योतंते हरिदंतराणि सुहृदां वृंदं समानंदति
त्वं चेदंचसि कांचनांगि वदनांभोजे विकासश्रियम्॥७२॥
पाटीरद्रुभुजंगपुंगवमुखायाता इवातापिनो
वाता वांति दहंति लोचनममी ताम्रा रसालद्रुमाः।
एते हंत किरंति कूजितमयं हालाहलं कोकिला
बाला बालमृणालकोमलतनुः प्राणान् कथं रक्षतु ७३
आयातैव निशा मनो मृगदृशामुन्निद्रमातन्वती
मानो मे कथमेष संप्रति निरातंकं हृदि स्थास्यति।

---

(७२) मानिनीं प्रति सखीजनस्योक्तिः। भजते भजिष्यते। वर्तमान-सामीप्ये वर्तमानवद्वेति लट्। एवमपरत्रापि। कलानिधिश्चंद्रः। अयं पुरोवर्ती। राका पौर्णमासी। स्वैरं परप्रयत्नमंतरेणैव। परितः समंतात्। मालिन्यं संकोचरूपम्। उन्मीलत्युदयते। वृंदं समूहः। अंचस्यंगीकरोषि। कांचनांगि सुवर्णगौरांगि। विकासश्रियं प्रकाशलक्ष्मीम्। मानत्यागः सर्वथैव श्रेयानिति भावः।

(७३) वसंते विरहिणीदशावर्णनमिदम्। पाटीरद्रुषु चंदनवृक्षेषु स्थिता ये भुजंगपुंगवास्तेषां मुखेभ्य आयाता इवातापिनः संताप-कारकाः। ताम्रास्ताम्रपर्णाः। रसालद्रुमा आम्रवृक्षाः। वसंते चूतः पल्लवं प्रसूत इति प्रसिद्धमेव। अत्र वाता रसालद्रुमाः कोकिलाश्चेति त्रयोऽपि बालायाः प्राणनाशार्थं युगपदहमहमिकया संपतंतीति समुच्चयालंकारोऽयम्।

(७४) उन्निद्रं विगतानिद्रम्। जाताभिलाषमिति यावत्। निरातंकं निःशंकम्। ऊहापोहं तर्कावितर्करूपां चिंताम्। सरोजनयना काचिन्मानिनी। विधत्तेतरामतिशयेन करोति। बभासे भासमानं बभूव। उदियायेत्यर्थः। कामनृपातपत्रसुषमं मदननृपतिच्छत्रशोभम्।

Digitized by Google

ऊहापोहमिमं सरोजनयना यावद् विधत्तेतरां
तावत् कामनृपातपत्रसुषमं बिंबं बभासे विधोः ॥७४॥
प्रभातसमयप्रभां प्रणयिनि ह्रुवाना रसा-
दमुष्य निजपाणिना दृशममीलयं लीलया ।
अयं तु खलु पद्मिनीपरिमलालिपाटच्चरै-
रवेरुदयमध्यगादधिकचारु तैर्मारुतैः ॥ ७५ ॥
विदूरादाश्चर्यस्तिमितमथ किंचित् परिचया-
दुदंचच्चांचल्यं तदनु परितः स्फारितरुचि ।
गुरूणां संघातं सपदि मयि याते समजनि
त्रपाघूर्णत्तारं नयनमिह सारंगजदृशः ॥७६ ॥

अत्र रात्रिसंनिधानादपि सिध्यतो मानिनीमानविनाशस्य चंद्रोदयादनायासेन सिद्धिर्वर्णितेति समाध्यलंकारोऽयम् ।

(७५) उषसि प्रियतमस्य प्रभातकालप्रभादर्शनं वारयितुमिच्छंत्याः कस्याश्चित् सखीं प्रत्युक्तिः । प्रणयिनि प्रियतमे । ह्रुवाना गोपयंती । रसाद्रागाद्धेतोः । अमुष्य प्रणयिनः । अयं प्रणयी । पद्मिनीनां ये परिमला विमर्दोत्थगंधास्तेषामालीनां पंक्तीनां पाटच्चरास्तस्कराः । पद्मिनीगंधापहारिण इति यावत् । अध्यगादज्ञासीत् । अधिकचार्वतिसम्यक् । तैः पूर्वपरिचितैः । प्रभातकालीनत्वेन पूर्वं ज्ञातैरित्यर्थः । अत्र कामिन्या प्रियतमकर्तृकप्रभातविषयकज्ञानाभावः साध्यमानोऽपि न सिद्ध इतीष्टाप्राप्त्या विषमालंकारोऽयम् ।

(७६) अत्र कश्चित् सखायं प्रत्यनपावृते स्थलविशेषे गुरून् शुश्रूषमाणायाश्चिरप्रोषितमसंभावितागमनमात्मानमालोकितवत्याः प्रियाया नयनव्यापारान् वर्णयति । स्तिमितं निश्चलम् । उदंचच्चांचल्यं प्राप्तचांचल्यम् । स्फारिता वृद्धिं प्रापिता रुचिः कांतिर्यस्य तथाविधम् । मयि गुरूणां संघातं याते सतीत्यन्वयः । संघातं समूहम् । त्रपया घूर्णंती भ्रमंती तारा कनीनिका यस्य तथाविधम् । सारंगजदृशो मृगशावाक्ष्याः ।

Digitized by Google

कपोलावुन्मीलन्नवपुलकपाली मयि मनाङ्
मृशत्यंतःस्मेरस्तबकितमुखांभोरुहरुचः ।
कथंकारं शक्याः परिगदितुमिंदीवरदृशो
दलद्द्राक्षानिर्यद्रसभरसपक्षा भणितयः ॥ ७७ ॥
राजानं जनयांबभूव सहसा जैवातृक त्वां तु यः
सोऽयं कुंठितसर्वशक्तिनिकरो जातो जरातो विधिः ।
संप्रत्युन्मदखंजरीटनयनावक्त्राय नित्यश्रिये
दाता राज्यमखंडमस्य जगतो धाता नवो मन्मथः॥७८॥
आविर्भूता यदवधि मधुस्यंदिनी नंदसूनोः
कांतिः काचिन्निखिलनयनाकर्षणे कार्मणज्ञा ।

---

(७७) नायकोक्तिरियम् । मय्युन्मीलन्नवपुलकपाली कपोलौ मनाङ् मृशति सतींदीवरदृशो भणितयः कथंकारं परिगदितुं शक्या इत्यन्वयः । उन्मीलंतो नवपुलका ययोस्तथाविधे पाली ययोस्तौ । मृशति स्पृशति । अंतःस्मेरांतर्विकसिता स्तबकितमुखांभोरुहस्य गुच्छायितमुखकमलस्य रुग् यस्यास्तथाविधायाः । कथंकारं कथम् । दलंती या द्राक्षा तस्याः सकाशान्निर्यन् यो रसभरस्तस्य सपक्षास्तुल्याः ।

(७८) कस्यचिच्चंद्रं प्रत्युक्तिः । राजानं सौंदर्यातिशयात्सर्वश्रेष्ठम् । जैवातृक चंद्र । जरातो वृद्धावस्थातः । मन्मथो नवो धातोन्मदखंजरीटनयनावक्त्रायास्य जगतोऽखंडं राज्यं दातेत्यन्वयः । उन्मदखंजरीटनयनावक्त्रायोन्मत्तखंजनाक्षीमुखाय । नित्यश्रिये सततश्रीकाय । अनिशं नयनाभिरामायेत्यर्थः । दाता दास्यति । अखंडं निष्कंटकम् । त्वत्तोप्यधिकरमणीयं नित्यशोभं कामिनीवदनं सर्वमिदं जगज्जेष्यतीति भावः ।

(७९) यदवधि यद्दिनादारभ्य । मधुस्यंदिनी मधुस्राविणी । अतीवमधुरेति यावत् । नंदसूनोः कृष्णस्य । कांतिः शरीरशोभा । काचिदनिर्वचनीया । कार्मणज्ञा मंत्रतंत्रादिकुशला । कुलमृगदृशां कुलस्त्री-

Digitized by Google

श्वासो दीर्घस्तदवधि मुखे पांडिमा गंडमूले
शून्या वृत्तिः कुलमृगदृशां चेतसि प्रादुरासीत् ॥७९॥
प्रसंगे गोपानां गुरुषु महिमानं यदुपते-
रुपाकर्ण्य स्विद्यत्पुलकितकपोला कुलवधूः ।
विषज्वालाजालं झटिति वमतः पन्नगपतेः
फणायां साश्चर्यं कथयतितरां तांडवविधिम् ॥ ८० ॥
कैशोरे वयसि क्रमेण तनुतामायाति तव्यास्तना-
वागामिन्यखिलेश्वरे रतिपतौ तत्कालमस्याज्ञया ।
आस्ये पूर्णशशांकता नयनयोस्तादात्म्यमंभोरुहां
किंचासीदमृतस्य भेदविगमः साचिस्मिते तात्विकः ॥

णाम् । विप्रलंभशृंगारोऽत्र व्यंग्यः ।

(८०) प्रसंगे गोपानां गुरुषु यदुपतेर्महिमानमुपाकर्ण्य स्विद्यत्पुलकितकपोला कुलवधूर्झटिति विषज्वालाजालं वमतः पन्नगपतेः फणायां तांडवविधिं साश्चर्यं कथयतितरामित्यन्वयः । प्रसंगे कालियकथाप्रसंगे । गोपानां गुरुषु वृद्धगोपसमीपे । यदुपतेः कालियमर्दनस्य कृष्णस्य । स्विद्यंतौ पुलकितौ च कपोलौ यस्यास्तथाविधा । झटिति सपद्येव । अस्य कथयतितरामित्यनेन संबंधः । पन्नगपतेः कालियस्य । साश्चर्यमाश्चर्येण सहितम् । तांडवविधिं यदुपतेरिति भावः । श्रीकृष्णमहिमश्रवणेन जनितामिलाषा वधूर्लज्जावती तद्विषयकरतिजन्यं स्वेदादिकं वृद्धगोपेष्वन्यथयितुं साश्चर्यं तादृशतांडवविधिं कथयतीति भावः । अत्रावहित्थं नाम व्यभिचारी व्यंग्यः । व्रीडादिना निमित्तेन हर्षाद्यनुभावानां गोपनाय जनितो भावविशेषोऽवहित्थम् ।

(८१) कैशारे वयसि बाल्ये । तनुतामायाति गच्छति सति । तनौ मूर्तौ । आगामिन्यागमिष्यति सति । अस्य रतिपतेः । आस्ये मुखे । पूर्णशशांकता पूर्णचंद्रत्वम् । अंभोरुहां कमलानां तादात्म्यमभेदः । भेदविगमो भेदराहित्यम् । साचिस्मित ईषद्धसिते । तात्विको यथार्थः ।

Digitized by Google

शायिता शैवलशयने सुषमाशेषा नवेंदुलेखेव ।
प्रियमागतमपि सविधे सत्कुरुते मधुरवीक्षणैरेव ॥ ८२॥
अधरद्युतिरस्तपल्लवा मुखशोभा शशिकांतिलंघिनी ।
तनुरप्रतिमा च सुभ्रुवो न विधेरस्य कृतिं विवक्षति ॥ ८३॥
व्यत्यस्तं लपति क्षणं क्षणमहो मौनं समालंबते
सर्वस्मिन्विदधाति किं च विषये दृष्टिं निरालंबनाम् ।
श्वासं दीर्घमुरीकरोति न मनागंगेषु धत्ते धृतिं
वैदेहीविरहव्यथाविकलितो हा हंत लंकेश्वरः ॥ ८४ ॥
उदितं मंडलमिंदोरुदितं सद्यो वियोगिवर्गेण ।
मुदितं च सकललनाचूडामणिशासनेन मदनेन ॥ ८५॥

---

(८२) सुषमाशेषा शोभामात्रशेषा । अतिकृशेत्यर्थः । मधुरवीक्षणैरेवेत्यत्र न प्रत्युद्गमचरणनिपतनादिभिरित्येवकारार्थः । अत्र नायिकागता प्रियविरहजन्या ग्लानिर्व्यंग्या ।

(८३) अस्तपल्लवा निरस्तकिसलया । पल्लवपदेनात्र पल्लवशोभा ग्राह्या । अस्य विधेः कृतिं न विवक्षतीत्यन्वयः । अस्य प्रसिद्धस्य । अस्या निर्माता कोप्यन्यो विधाता स्यादिति भावः ।

(८४) व्यत्यस्तं विपरीतमसंबद्धं वा । लपति वदति । एकं क्षणमितिपूर्वान्वयि । अपरमुत्तरान्वयि । निरालंबनां शून्याम् । अंगेषु शरीरावयवेषु । धृतिमनवसादम् । वैदेही सीता । विकलितो व्याकुलः । हा हंतेति खेदातिशये । लंकेश्वरो रावणः । अत्र रतेरनुभयनिष्ठतया जगद्गुरुपत्नीविषयकतया चाभासत्वं विप्रलंभस्य ।

(८५) चंद्रोदयसमयवर्णनम् । उदितमुदयं प्राप्तम् । मुदितमित्यत्र भावे क्तः । सकललनानां चूडामणिभूतं शासनं यस्य तेन । अत्र तिस्रः क्रिया युगपत् प्रवृत्ता इति वर्णनात् समुच्चयालंकारोऽयम् । तेन चातिशयोक्तिः कार्यकारणयौगपद्यात्मिका व्यज्यते ।

Digitized by Google

प्रादुर्भवति पयोदे कज्जलमलिनं बभूव नभः ।
रक्तं च पथिकहृदयं कपोलपाली मृगीदृशः पांडुः॥ ८६
इदमप्रतिमं पश्य सरः सरसिजैर्वृतम् ।
सखे मा जल्प नारीणां नयनानि दहंति माम् ॥ ८७॥
मुंचसि नाद्यापि रुषं भामिनि मुदिरालिरुदियाय ।
इति सुदृशः प्रियवचनैरपायि नयनाब्जकोणशोणरुचिः ॥८८
आलोक्य सुंदरि मुखं तव मंदहासं
नंदंत्यमंदमरविंदधिया मिलिंदाः ।
किं चासिताक्षि मृगलांछनसंभ्रमेण
चंचूपुटं चटुलयंति चिरं चकोराः ॥ ८९ ॥

---

(८६) कज्जलमिव मलिनम् । रक्तं रागयुक्तम् । पांडुर्विरहदुःखादिति भावः । अयं समुच्चयालंकारः ।

(८७) सरस्तटगतयोः कयोश्चित् संवादोऽयम् । एकेन प्रथमार्धमुक्तं द्वितीयार्धं चापरेण । वृतं चितम् । मा जल्पेदमप्रतिममित्यादि मा भण यतः सरासिजसादृश्यद्वारा स्मृतानि नारीनयनानि मां संतापयंति । अयं स्मरणालंकारध्वनिः ।

(८८) रुष्टां नायिकां प्रति नायकस्योक्तिः । मुदिरालिर्मेघपंक्तिः । अपायि पीता । निःशेषं यापितेत्यर्थः । नयनाब्जकोणस्य नयनकमलप्रांतस्य शोणरुची रक्तकांतिः । अत्र नायिकाया रोषनाशो व्यंग्यः ।

(८९) नंदंति हृष्यंति । अमंदमत्यंतम् । अरविंदधिया कमलमिदमिति मत्वा । मिलिंदा भ्रमराः । असिताक्षि कृष्णनयने । मृगलांछनसंभ्रमेण चंद्रभ्रांत्या । चटुलयंति चपलयंति । अत्रोल्लेखालंकारो भ्रांतिमता संकीर्णः । उल्लेखश्चैकस्य वस्तुनो निमित्तवशादनेकैर्ग्रहीतृभिरनेकप्रकारकं ग्रहणम् ।

86—Omitted in E, F.

Digitized by Google

स्मितं नैतत् किं तु प्रकृतिरमणीयं विकसितं
मुखं ब्रूते को वा कुसुममिदमुद्यत्परिमलम् ।
स्तनद्वंद्वं मिथ्या कनकनिभमेतत् फलयुगं
लता रम्या सेयं भ्रमरकुलनम्या न रमणी ॥ ९० ॥
संग्रामांगणसंमुखाहतकियद्विश्वंभराधीश्वर-
व्यादीर्णीकृतमध्यभागविवरोन्मीलन्नभोनीलिमा ।
अंगारप्रखरैः करैः कवलयन्नेतन्महीमंडलं
मार्तंडोऽयमुदेति केन पशुना लोके शशांकीकृतः ॥ ९१॥
श्यामं सितं च सुदृशो न दृशोः स्वरूपं
किं तु स्फुटं गरलमेतदथामृतं च ।

---

(९०) एतत् पुरो भासमानम् । प्रकृत्या स्वभावेनैव रमणीयम् । उद्यत्परिमलं प्राप्तामोदम् । भ्रमरकुलनम्या भ्रमरसंघभजनीया । सावयवेयमपह्नुतिः ।

(९१) उदयंतं चंद्रं दृष्ट्वा कस्याचिद्विरहिण उक्तिरियम् । संग्रामांगणे संमुखमाहता ये कियंतः कतिपये विश्वंभराधीश्वरा राजानस्तैर्व्या दीर्णीकृतो विदारितो यो मध्यभागस्तस्य विवरेणोन्मीलन् प्रकाशमानो नभोनीलिमाऽऽकाशकालिमा यस्मिन् सः । कवलयन् कवलीकुर्वन् । मार्तंडः सूर्यः । पशुना पशुतुल्येनाज्ञानेन । शशांकीकृतः शंशचिह्नवत्त्वेन चंद्रत्वेन कल्पितः । अत्र विरही भ्रांतत्वाच्चंद्रं साच्छिद्रं मार्तंडं मन्यते । रणे संमुखं हतानां वीराणां सूर्यमंडलभेदेन ब्रह्मलोकगमनं शास्त्रसिद्धम् । उक्तं च महाभारते

द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥

(९२) सितं श्वेतम् । दृशोर्नयनयोः । गरलामृतयोर्मोहमुदोश्च यथा संख्येन संबंधः । नो चेदन्यथा । श्यामसितस्वरूपयोर्गरलत्वामृतत्वाभाव इत्यर्थः । अनयोर्दृशोः । तदैव तस्मिन्नेवक्षणे । निपतनसमकालमेवेत्यर्थः । इयमपह्नुतिः ।

Digitized by Google

नो चेत् कथं निपतनादनयोस्तदैव
मोहं मुदं च नितरां दधते युवानः ॥ ९२ ॥
अलिर्मृगो वा नेत्रं वा यत्र किंचिद्विभासते ।
अरविंदं मृगांको वा मुखं वेदं मृगीदृशः ॥ ९३ ॥
सुविरलमौक्तिकतारे धवलांशुकचंद्रिकाचमत्कारे ।
वदनपरिपूर्णचंद्रे सुंदरि राकाऽसि नात्र संदेहः ॥ ९४॥
रूपजला चलनयना नाभ्यावर्ता कचावलिभुजंगा ।
मज्जंति यत्र संतः सेयं तरुणी तरंगिणी विषमा ॥९५॥
शोणाधरांशुसंभिन्नास्तन्वि ते वदनांबुजे ।
केसरा इव काशंते कांतदंतालिकांतयः ॥ ९६ ॥

---

(९३) ससंदेहालंकारोऽयम् । संशयश्चात्राहार्यस्तत्वज्ञकविगतत्वात् । यत्र यस्मिन् मुखरूपे वस्तुनि । विभासते शोभते । इदं पुरोवर्ति ।

(९४) इदं सुंदर्युपमेयकं राकोपमानकं समस्तवस्तुविषयं सावयवं रूपकम् । सुविरलमौक्तिकान्येव तारा यस्यां तथाविधे । धवलांशुकमेव चंद्रिका तस्याश्चमत्कारो यस्यां तथाविधे । वदनमेव परिपूर्णचंद्रो यस्यां तथाविधे । राका पौर्णमासी ।

(९५)इदं तरुण्यां तरंगिणीरूपकमेकदेशविवर्ति सावयवम् । रूपमेव जलं यस्याः सा । आवर्तोऽभोभ्रमः । तरंगिणी सरित् । विषमा दुस्तरा । अत्र जलावर्तादिरूपकैर्नयनयोर्मीनरूपकं कवेरभिप्रेततयाऽऽक्षिप्यते । अत एव चलनयनेति विशेषणं चलनयनमीनेत्यर्थे ग्राह्यम् ।

(९६) शोणाधरस्य रक्ताधरस्यांशुभिः प्रभाभिः संभिन्ना मिश्रीभूताः । वदनाब्जमित्युपमितसमासः । काशंते शोभंते । कांतदंतालिकांतयः सुंदरदंतपंक्तिप्रभाः ।

94—96—Omitted in C, E, F.

Digitized by Google

दयिते रदनत्विषां मिषा-
दयि तेऽमी विलसंति केसराः ।
अपि चालकवेषधारिणो
मकरंदस्पृहयालवोऽलयः ॥ ९७ ॥
तया तिलोत्तमीयंत्या मृगशावकचक्षुषा ।
ममाऽयं मानुषो लोको नाकलोक इवाभवत् ॥ ९८ ॥
अंकायमानमलिके मृगनाभिपंकं
पंकेरुहाक्षि वदनं तव वीक्ष्य बिभ्रत् ।
उल्लासपल्लवितकोमलपक्षमूला-
श्चंचूपुटं चटुलयंति चिरं चकोराः ॥ ९९ ॥

---

(९७) नायकस्य नायिकां प्रत्युक्तिः । रदनत्विषां दंतकांतीनाम् । अलकवेषधारिणो केशरूपेण वर्तमानाः । मकरंदस्पृहयालवो मकरंदस्पृहां कुर्वाणाः । अत्र वाच्याभ्यां द्वाभ्यामपह्नुतिभ्यां न त्वं नारी किं तु नलिनीति तृतीयापह्नुतिर्व्यज्यते ।

(९८) तया कयाचिद्वक्तृबुद्धिस्थया कामिन्या । तिलोत्तमीयंत्या तिलोत्तमामिवात्मानमाचरंत्या । तिलोत्तमा नाम काचिदप्सराः । नाकलोकः स्वर्गः ।

(९९) कांचित् कामिनीं प्रति कस्यचिदुक्तिः । अंकायमानमंकीभूतम् । चंद्रगतांकमिव दृश्यमानमित्यर्थः । अलिके भाले । मृगनाभिपंकं कस्तूरिकातिलकम् । मृगनाभिपंकं बिभ्रत्तव वदनं वीक्ष्येत्यन्वयः । उल्लासेनानंदेन पल्लवितं प्रसारितं कोमलपक्षमूलं येषां ते । अत्र सकस्तूरीतिलके कांतावदने सकलंकचंद्रभ्रम एव चंचूचापल्ये हेतुरिति भ्रांतिमानलंकारः प्राधान्येन व्यंग्यः ।

98—99—Omitted in C, E, F.

Digitized by Google

शिशिरेण यथा सरोरुहं
दिवसेनामृतरश्मिमंडलम् ।
न मनागपि तन्वि शोभते
तव रोषेण तथेदमाननम् ॥ १०० ॥
चलद्भृंगमिवांभोजमधीरनयनं मुखम् ।
तदीयं यदि दृश्येत कामः क्रुद्धोऽस्तु किं ततः ॥ १०१ ॥
शतकोटिकठिनचित्तः सोऽहं तस्याः सुधैकमयमूर्तेः ।
येनाकारिषि मित्रं स विकलहृदयो विधिर्वाच्यः ॥ १०२ ॥
श्यामलेनांकितं बाले भाले केनापि लक्ष्मणा ।
मुखं तवांतरासुप्तभृंगफुल्लांबुजायते ॥ १०३ ॥
अद्वितीयं रुचात्मानं मत्वा किं चंद्र लप्स्यसि ।

---

(१००) अमृतरश्मिः सूर्यः । चन्द्रः ।

(१०१) नायकोक्तिः । अधीरनयनं चंचलनयनम् । तदीयं पूर्वदृष्टकामिनीसंबंधि ।

(१०२) एषा सीतां विवासितवतो रामस्य स्वात्मगतोक्तिः । शतकोटिर्वज्रम् । येन सोऽहं तस्या मित्रमकारिषीत्यन्वयः । तस्याः सीतायाः । अकारिषि कृतः । कर्मणि लुङ् । विकलहृदयोऽरसिकचित्तः । सदृशसं योगपराङ्मुख इति यावत् ।

(१०३) श्यामलेन लक्ष्मणेत्यन्वयः । श्यामलेन श्यामेन । लक्ष्मणा चिह्नेन । अंतरासुप्तभृंगफुल्लांबुजायतेंऽतःसुप्तभ्रमरं विकसितकमलमिवाभाति ।

(१०४) कस्यचिद्विदेशस्थितस्य किरणैरात्मानं संतापयंतं चंद्रं प्रत्येषोक्तिः । रुचा कांत्या । विनिभालितं दृष्टम् । अत्रास्ति मम प्रियायाः कदापि बहिरनिर्गताया अत एव त्वयाप्यदृष्टाया आननं त्वत्स-

---

100—104—Omitted in C, E, F.

Digitized by Google

भूमंडलमिदं मूढ केन वा विनिभालितम् ॥ १०४ ॥
नीलांचलेन संवृतमाननमाभाति हरिणनयनायाः ।
प्रतिबिंबित इव यमुनागभीरनीरांतरेणांकः ॥ १०५ ॥
स्तनाभोगे पतन् भाति कपोलात्कुटिलोऽलकः ।
शशांकबिंबतो मेरौ लंबमान इवोरगः ॥ १०६ ॥
यथा लतायाः स्तबकानतायाः
स्तनावनम्रे नितरां समाऽसि ।
तथा लता पल्लविनी सगर्वे
शोणाधरायाः सदृशी तवाऽपि ॥ १०७ ॥
इदं लताभिः स्तबकानताभि-
र्मनोहरं हंत वनांतरालम् ।
सदैव सेव्यं स्तनभारवत्यो
न चेद्युवत्यो हृदयं हरेयुः ॥ १०८ ॥

दृशमिति प्रतीयमानोपमा मूढपदेन ध्वन्यमानायां चंद्रविषयायां वक्तृगतायामसूयायामलंकारः ।

(१०५) नीलांचलेन नीलपटांतेन । एणांकश्चंद्रः ।

(१०६) आभोगो विस्तारः । उरगः सर्पः ।

(१०७) कस्यचित् कांचित्कामिनीं प्रत्युक्तिः । स्तबकानतायाः पुष्पगुच्छैरवनम्रायाः । स्तनावनम्राऽहं स्तबकानताया लताया उपमानमस्मीति गर्वं मा विदध्या यतः शोणाधराया उपमेयायास्तवापि पल्लविनी लतोपमानं भवतीति भावः ।

(१०८) इदं पुरोवर्ति । सेव्यं भवेदिति शेषः । अत्र वनांतरालगताभिः स्तबकानताभिर्लताभिः स्तनभारवतीनां युवतीनां स्मरणं प्राधान्येन व्यज्यते । अत एवायं स्मरणालंकारध्वनिः ।

105—108—Omitted in C, E, F.

Digitized by Google

सा मदागमनबृंहिततोषा
जागरेण गमिताखिलदोषा ।
बोधिताऽपि बुबुधे मधुपैर्न
प्रातराननजसौरभलुब्धैः ॥ १०९ ॥
अविचिंत्यशक्तिविभवेन सुंदरि
प्रथितस्य शंबररिपोः प्रभावतः ।
विधुभावमंचतितमां तवाननं
नयने सरोजदलनिर्विशेषताम् ॥ ११० ॥
मीनवती नयनाभ्यां करचरणाभ्यां प्रफुल्लकमलवती ।
शैवालिनी च केशैः सुरसेयं सुंदरी सरसी ॥ १११ ॥
पांथ मंदमते किं वा संतापमनुविंदसि ।
पयोधरं समाशास्व येन शांतिमवाप्नुयाः ॥ ११२ ॥

(१०९) नायकोक्तिः । सा नायिका । मदागमनेन बृंहितो वृद्धिं गतो तोषो यस्याः सा । दोषा रात्रिः । मधुपैर्भ्रमरैः । अत्र नायिकाया रात्रिजागरणप्रयोज्यं चेतःसंमीलनं व्यंग्यम् । एतादृशं चेतःसंमीलनमालंकारिकैर्निद्रापदेन व्यवह्रियते ।

(११०) नायकोक्तिः । अविचिंत्यशक्तिविभवेन प्रथितस्येत्यन्वयः । प्रथितस्य प्रसिद्धस्य । शंबररिपोर्मदनस्य । अंचतितमां गच्छतितमाम् । निर्विशेषतां तुल्यताम् । नयने अंचतंस्तमामिति शेषः ।

(१११) सुंदर्या सरसीरूपकामिदम् । नयनाभ्यामित्यादावभेदस्तृतीयार्थः । शैवालिनी सशैवाला ।

(११२) कस्यचित्पांथं प्रत्युक्तिः । किं वा किमिति । वात्र प्रश्नदृढीकरणे । संतापं दाहं स्मरतापं च । अनुविंदसि प्राप्नोषि । पयोधरं मेघं कामिनीस्तनं च । अत्र सहृदयस्य स्मरतापवत्तावैशिष्ट्यबुद्धौ सत्यां तादृशतापशामकरमणीस्तनरूपविषयस्य मेघरूपविषायिणि तादृप्यबुद्धिर्भवति ।

110–Omitted in C,D,E, F; 111–112–Omitted in C, E, F.

Digitized by Google

संपश्यतां तामतिमात्रतन्वीं
शोभाभिराभासितसर्वलोकाम् ।
सौदामिनी वा सितयामिनी वे-
त्येवं जनानां हृदि संशयोऽभूत् ॥ ११३ ॥
सपल्लवा किं नु विभाति वल्लरी
सफुल्लपद्मा किमियं नु पद्मिनी ।
समुल्लसत्पाणिपदां स्मिताननां-
मितीक्षमाणैः समलंभि संशयः ॥ ११४ ॥
नेत्राभिरामं रामाया वदनं वीक्ष्य तत्क्षणम् ।
सरोजं चंद्रबिंबं वेत्यखिलाः समशेरत ॥ ११५ ॥
कनकद्रवकांतिकांतया
मिलितं राममुदीक्ष्य कांतया ।
चपलायुतवारिदभ्रमा-

---

(११३) संपश्यतां जनानां हृदीत्यन्वयः । तां कांचित्कामिनीम् । आभासितसर्वलोकां धवलितसमस्तजगतीतलाम् । सौदामिनी विद्युत् । सितयामिनी धवलरात्रिः । ज्योत्स्नीति यावत् । ससंदेहालंकारोऽयम् ।
(११४) वल्लरी वल्लिः । स्मिताननामीक्षमाणैरिति संशयः समलंभीत्यन्वयः । ईक्षमाणैः पार्श्ववर्तिभिर्जनैरिति शेषः ।अयमपि ससंदेहालंकारः ।
(११५) रामायाः कांतायाः । समशेरत संशयं प्रापुः । ससंदेहालंकारः ।
(११६) कनकद्रवकांतिकांतया सुवर्णरसकांतिमनोज्ञया । कांतया सीतया । चपलायुतवारिदभ्रमात् सताडिन्मेघभ्रांत्या । अत्र भगवति रामचंद्रे श्यामवर्णत्वाच्चातकपोतकगता मेघभ्रांतिरुपनिबद्धा । जानक्यां च कनकद्रवकांतिकांतत्त्वात्तडिद्भ्रांतिः । अत एवायं भ्रांतिमान-

---

11 3–116–Omitted in C, E,F.

Digitized by Google

कलाहीनं दीनं विकल इव राजानमकरोत् ॥ १२५ ॥
स्तनांतर्गतमाणिक्यवपुर्बहिरुपागतम् ।
मनोऽनुरागि ते तन्वि मन्ये वल्लभमीक्षितुम् ॥ १२६ ॥
जगदंतरमम्रतमयै-
रंशुभिरापूरयन्नितराम् ।
उदयति वदनव्याजात्
किमु राजा हरिणशावनयनायाः ॥ १२७ ॥
तिमिरशारदचंदिरचंद्रिकाः
कमलविद्रुमचंपककोरकाः ।
यदि मिलंति कदापि तदाननं
खलु तदा कलया तुलयामहे ॥ १२८ ॥

कलरम्यवस्तूनामग्रे स्थापयामास । यस्मात् त्वन्मुखादधरं कलाहीनं दीनं विधुं प्रजापतिः सकलरम्यविषयाणामग्रेसरं कृत्वा स्वाविचार्यकारित्वं ख्यापयत्यतः स तवाननं निर्माय महामोहोपहतोऽभूदिति मन्य इति भावः ।

(१२६) नायिकां प्रत्युक्तिः । स्तनांतर्गतमाणिक्यवपुः स्तनद्वयमध्यगतमाणिक्याकारम् । तद्व्याजादित्यर्थः । अनुरागि रागयुक्तम् । अत्र वल्लभेक्षणरूपफलस्य मनस्युत्प्रेक्षा । तन्निमित्तं चांतःप्रदेशाद्बहिरागमनं यदपेक्ष्यते तद्बहिःप्रदेशस्थितमाणिक्यमात्रवृत्ति मनसो न संभवतीत्यपह्नुत्या मनोगतं क्रियते ।

(१२७) जगदंतरं जगतीतलम् । राजा चंद्रः । इयमप्युत्प्रेक्षा ।

(१२८) केषांचिन्मत इयमतिशयोक्तिरसंबंधेऽपि संबंधरूपा । संबंधश्चात्र वर्ण्योत्कर्षार्थः।अत्र तिमिरादीनां मुखावयवसदृशानां मुखेनासंबंधेऽपि संबंधवर्णनान्मुखस्योत्कर्षः प्रतीयते । शारदचंदिरः शरच्चंद्रमा । तस्याः पूर्वावलोकितायाः कामिन्या आननं मुखम् ।

126–128–Omitted in C, E, F.

Digitized by Google

प्रिये विषादं जहिहीति वाचं
प्रिये सरागं वदति प्रियायाः ।
वारामुदारा विजगाल धारा
विलोचनाभ्यां मनसश्च मानः ॥ १२९ ॥
राज्याभिषेकमाज्ञाय शंबरासुरवैरिणः ।
सुधाभिर्जगतीमध्यं लिंपतीव सुधाकरः ॥ १३० ॥
आननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतम् ।
भ्रमद्भ्रमरसंभारं स्मरामि सरसीरुहम् ॥ १३१ ॥
यांती गुरुजनैः साकं स्मयमाननांबुजा ।
तिर्यग्ग्रीवं यदद्राक्षीत् तन्निष्पत्राकरोज्जगत् ॥ १३२ ॥

---

(१२९) मानिनीं प्रति नायकोक्तिः । प्रथमं " प्रिये " इति संबोधनविभक्त्यंतं द्वितीयं सप्तम्यंतम् । प्रियाया विलोचनाभ्यां वारां धारा विजगाल मनसश्च मानो विजगालेत्यन्वयः । वारामश्रुजलानाम् । उदारा महती । तुल्ययोगितालंकारोऽयम् । प्रकृतानामेवाप्रकृतानामेव वा गम्यौपम्य एकधर्मान्वयस्तुल्ययोगिता ।

(१३०) शंबरासुरवैरिणो मदनस्य । इयं समासोक्तिमूलोत्प्रेक्षा । अत्र हि स्वामिसेवकव्यवहारो व्यंग्यः । तन्मूला च किरणव्यापने विषये सुधालेपनोत्प्रेक्षा ।

(१३१) लोलालकावृतं चलत्केशावृतम् । अयं स्मरणालंकारः ।

(१३२) साकं सह । तिरश्ची ग्रीवा यस्मिन् कर्मणि तद्यथा तथा । निष्पत्राकरोत् सपुंखशरस्यापरपार्श्वे निर्गमनात्पत्ररहितमकरोत् । गतप्राणमिवाकरोदिति यावत् । सपत्रनिष्पत्रादतिव्यथन इति डाच् । अत्र क्रियाविशेष्यकबोधवादिनां मते रूपकं प्रथमांताविशेष्यकबोधवादिनां मते च निदर्शनालंकारः ।

129—132—Omitted in C, E, F.

Digitized by Google

नयनानि वहंतु खंजनाना-
मिह नानाविधमंग भंगभाग्यम् ।
सदृशं कथमाननं सुशोभं
सुदृशो भंगुरसंपदांऽबुजेम ॥१३३॥
मृणालमंदानिलचंदनाना-
मुशीरशैवालकुशेशयानाम् ।
वियोगदूरीकृतचेतनानां
विनैव शैत्यं भवति प्रतीतिः ॥ १३४ ॥
विबोधयन् करस्पर्शैः पद्मिनीं मुद्रिताननाम् ।
परिपूर्णोऽनुरागेण प्रातर्जयति भास्करः ॥ १३५ ॥
आनम्य वल्गुवचनैर्विनिवारितेऽपि
रोषात् प्रयातुमुदिते मयि दूरदेशम् ।

(१३३) खंजनानां नयनानीह भंगभाग्यं वहंत्वित्यन्वयः । खंजनानां खंजरीटानाम् । इहास्मिन् सुदृशो नयने वर्तमानम् । अंगेत्यव्ययं खल्वर्थे । भंगभाग्यं तरंगसौभाग्यम् । भंगुरसंपदाऽस्थिरशोभेन । अयं व्यतिरेकालंकारः ।

(१३४) वियोगदूरीकृतचेतनानां जनानामिति शेषः । शैत्यं विनैव प्रतीतिरुष्णत्वेन प्रतीतिः । विनोक्तिरियमलंकारभाष्यकारमते ।

(१३५) विबोधयन् विकासयंश्चालयंश्च । करस्पर्शैः किरणस्पर्शैर्हस्तस्पर्शैश्च । पद्मिनीं कमलिनीं नायिकाविशेषं च । मुद्रिताननां मुकुलितां म्लानवदनां च। अनुरागेण ताम्रत्वेन स्नेहेन च । अत्र किरणस्पर्शैः कमलिनीं विकासयतो भास्करस्य वृत्तांतो वाच्यो हस्तस्पर्शैर्नायिकामनुनयतो नायकस्य वृत्तांतेनाभिन्नतया स्थितः । इयं समासोक्तिः ।

(१३६) कस्यचिद्विदेशगमनोद्यस्यनिमित्तवशात्प्रतिनिवृत्तस्य सखायं

133—135 Omitted in C. E. F

Digitized by Google

बाला करांगुलिनिदेशवशंवदेन
क्रीडाबिडालशिशुनाऽऽशु रुरोध मार्गम् ॥ १३६ ॥
अभूदप्रत्यूहः कुसुमशरकोदंडमहिमा
विलीनो लोकानां सह नयनतापोऽपि तिमिरैः ।
तवाऽस्मिन् पीयूषं किरति परितस्तन्वि वदने
कुतो हेतोः श्वेतो विधुरयमुदेति प्रतिदिनम् ॥ १३७ ॥
विनैव शस्त्रं हृदयानि यूनां
विवेकभाजामपि दारयंत्यः ।
अनल्पमायामयवल्गुलीला

प्रत्युक्तिः । वल्गुवचनैर्मधुरवचनैः । करांगुल्या यो निदेशस्तस्य वशंवदेनाधीनेन । बिडालशिशुना मार्जारपोतेन । प्रस्थानकाले मार्जारेण मार्गरोधो महदनिमित्तमिति शकुनज्ञाः । अत्राहं प्रवासान्निवृत्तोऽस्मीति प्रस्तुतं कार्यमप्रस्तुतेन कारणेन गम्यत इत्यप्रस्तुतप्रशंसेयम् ।
(१३७) अप्रत्यूहो निर्विघ्नः । कुसुमशरकोदंडमहिमा मदनचापप्रतापः । अस्मिंस्तव वदने पीयूषं किरति सतीत्यन्वयः । अत्र कामिनीवदनस्य विधुसंबंधिसकलप्रयोजननिष्पादनक्षमत्वान्निष्प्रयोजनत्वेन विधुराधिक्षिप्यते । आक्षेपालंकारोऽयमित्येके । प्रतीपप्रभेद इत्यपरे । द्वितीयपादे सहोक्तिः स्पष्टैव । इदं पद्यम्
अभूदप्रत्यूहः सकलहरिदुच्छासनविधि-
र्विलीनो लोकानां स हि नयनतापोऽपि कमले ।
तवास्मिन् पीयूषं किरति वदने रम्यवदने
कुतो हेतोश्चेतो विधुरयमुदेति स्म जलधेः ॥
इति रूपेण पंडितराजकृतलक्ष्मीलहर्यामपि दृश्यते ।
(१३८) अनल्पमायामय्यो वल्गवश्च लीला यासां ताः। वल्गवो मनोज्ञाः। अत्र शस्त्ररूपकारणाभावसामानाधिकरण्येन दारणरूपकार्योत्पत्ति-

---

136–138–Omitted in C, E, F.

Digitized by Google

जयंति नीलाब्जदलायताक्ष्यः ॥ १३८ ॥
यदवधि विलासभवनं यौवनमुदियाय चंद्रवदनायाः ।
दहनं विनैव तदवधि यूनां हृदयानि दह्यंते ॥ १३९ ॥
न मिश्रयति लोचने सहासितं न संभाषते
कथासु तव किं च सा विरचयत्यरालां भ्रुवम् ।
विपक्षसुहृशः कथामिति निवेदयंत्या पुरः
प्रियस्य शिथिलीकृतः स्वविषयेऽनुरागग्रहः ॥ १४० ॥
वडवानलकालकूटवन्-
मकरव्यालगणैः सहैधितः ।
रजनीरमणो भवेन्नृणां
न कथं प्राणवियोगकारणम् ॥ १४१ ॥
लभ्येत पुण्यैर्गृहिणी मनोज्ञा
तया सुपुत्राः पारितः पवित्राः ।

निबद्धेति विभावनालंकारोऽयम् ।

(१३९) अयं विभावनालंकारः प्रसिद्धकारणस्य दहनस्याभावेऽपि दाहरूपकार्योत्पत्तिवर्णनात् ।

(१४०) सपत्न्यां प्रियेणाज्ञातयौवनात्वेनैव विदितायां तदनुरागप्रतिबंधार्थं प्रियस्य पुरस्तदीयदुर्गुणानावेदयंत्याः कस्याश्चित् प्रौढनायिकाया उक्तिरियम् । तव कथासु त्वद्विषयककथासु । अरालां वक्राम् । अप्रियसूचिकामिति भावः । विपक्षसुहृशः सपत्न्याः । पुरोऽर्थात् प्रियस्य । स्वविषय आत्मनि । अत्र प्रौढनायिकया चिकीर्षितोऽर्थो न संपादितः स्वस्मिन्ननुरागक्षतिश्च संपादितेति विषमालंकारोऽयम् ।

(१४१) कस्यचिद्विरहिण उक्तिरियम् । एधितो वृद्धिं गतः । रजनीरमणश्चंद्रः । अयं समालंकारः ।

(१४२) स्फीतं विमलम् । अस्य प्रस्तुतस्य कस्यचित् पुरुषस्य । इयं

139–142–Omitted in C, E, F.

Digitized by Google

स्फीतं यशस्तैः समुदेति नित्यं
तेनास्य नित्यः खलु नाकलोकः ॥ १४२ ॥
प्रभुरपि याचितुकामो भजते वामोरु लाघवं सहसा ।
यदहं त्वयाऽधरार्थी सपदि विमुख्या निराशतां नीतः॥१४३॥
जलकुंभमुंभितरसं सपदि सरस्याः समानयंत्यास्ते ।
तटकुंजगूढसुरतं भगवानेको मनोभवो वेद ॥१४४ ॥
त्वामिव पथिकः प्रियो मे विटपिस्तोमेषु गमयति क्षेशान् ।
किमितोऽन्यत् कुशलं मे संप्रति यत्पांथ जीवामि ॥१४५

कारणमाला । यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुता तदा कारणमालेति सा काव्यप्रकाशे लक्षिता । इदं पद्यं शृंगारविलासे नांतर्भावमर्हतीति भाति ।

(१४३) नायकस्य नायिकां प्रत्युक्तिः । विमुख्या मुखं परावर्तयंत्या । अयमर्थांतरन्यासः । अत्र कामुकयोर्वृत्तांतेन विशेषेण दातृयाचकवृत्तांतः सामान्यात्मा समर्थ्यते ।

(१४४) गूढसुरतरतां कांचित् कामिनीं प्रति सख्या उक्तिः । उंभितरसं पूरितजलम् ।सपदि झटिति । त्वरयेति यावत् । सरस्याः सरोवरात् । तटकुंजगूढसुरतमिति सप्तमीतत्पुरुषः । मनोभवो मदनः । वेद जानाति । अत्र सुरतगमकानां स्वेदकंपनिःश्वासानां जलकुंभानयनत्वराजनितैस्तैर्भेदस्याग्रहणात् सुरतस्य प्रकाशो न भवति । अयं मीलितालंकारः । स्फुटमुपलभ्यमानस्य कस्यचिद्वस्तुनो लिंगैरतिसाम्याद्भिन्नत्वेनागृह्यमाणानां वस्त्वंतरलिंगानां स्वकारणाननुमापकत्वं च तल्लक्षणम् ।

(१४५) इयं कस्याश्चित् प्रोषितभर्तृकायाः कांचित् पथिकं प्रत्युक्तिः । विटपिस्तोमेषु वृक्षखंडेषु । इदमुन्नीतप्रश्नमुत्तरम् । अत्र प्रोषितभर्तृकाया उत्तरेण पांथकर्तृकः कुशलप्रश्नोऽनुमीयते कुशलमपृष्टायाः कुशलोक्तेरयोगात् ।

143—145–Omitted in C, E, F.

Digitized by Google

किमिति कृशाऽसि कृशोदरि किं तव परकीयवृत्तांतैः ।
कथय तथापि मुदे मम कथयिष्यति पांथ तव जाया॥१४६॥
तुलामनालोक्य निजामखर्वं
गौरांगि गर्वं न कदापि कुर्याः ।
लसंति नानाफलभारवत्यो
लताः कियत्यो गहनांतरेषु ॥ १४७ ॥
इयमुल्लसिता मुखस्य शोभा
परिफुल्लं नयनांबुजद्वयं ते ।
जलदालिमयं जगद्वितन्वन्
कलितः कापि किमालि नीलमेघः ॥ १४८ ॥
आसायं सलिलांतः सवितारमुपास्य सादरं तपसा ।
अधुनाब्जेन मनाक् तव मानिनि तुलना मुखस्याऽऽपि॥१४९

(१४६) कस्याश्चित् पथिककामिन्याः पथिकांतरेण संवादोऽयम् । इदं निबद्धप्रश्नमुत्तरम् । अत्र हेतुं चेद्वदसि तदा प्रतिक्रिरिष्यामीत्याद्यप्रश्नस्य व्यंग्यम् । उत्तरस्य तु न मया पतिव्रतया हेतुर्वक्तुं परपुरुषं प्रति योग्यो न च त्वया प्रतिकर्तुं शक्य इति । द्वितीयप्रश्नस्य व्यंग्यमलं पातिव्रत्येनाविदग्धजनहठमात्रविलसितेन स्वपरसंतोष एव संसारसार इति । द्वितीयोत्तरस्य तु या मम दशा सैव तव जायाया अपि दशास्ति सैव प्रतिक्रियताम् । न हि स्वकीयं सदनं दह्यमानमुपेक्ष्य कश्चित् परसदनाग्निं प्रतिकरोतीत्यादि व्यंग्यम् ।

(१४७) कस्यचित्कांचित् कामिनीं प्रत्युक्तिः । अखर्वं महांतम् । गहनांतरेषु काननप्रदेशेषु । केषांचिन्मतेऽयं प्रतीपप्रभेदः ।

(१४८) श्रीकृष्णं दृष्टवतीं कांचित् गोपिकां प्रति सख्या उक्तिः। कलितो दृष्टः । नीलमेघो नीलमेघत्वेनाध्यवसितः कृष्णः । इदं पद्यमस्पष्टार्थम् ।

(१४९) नायकस्य नायिकां प्रत्युक्तिः । आसायं पश्चिमसंध्यासमयादा-

147–149–Omitted in C, E, F.

Digitized by Google

अयि मंदस्मितमधुरं वदनं तन्वंगि यदि मनाक् कुरुषे ।
अधुनैव कलय शमितं राकारमणस्य हंत साम्राज्यम्॥१५०॥
मधुरतरं स्मयमानः स्वस्मिन्नेवालपञ्च्छनैः किमपि ।
कोकनदयंस्त्रिलोकीमालंबनशून्यमीक्षते क्षीवः॥१५१॥
मधुरसान्मधुरं हि तवाधरं
तरुणि मद्दने विनिवेशय ।
मम गृहाण करेण करांबुजं
प प पतामि ह हा भ भ भूतले ॥ १५२ ॥
शतेनोपायानां कथमपि गतः सौधशिखरं
सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने ।
विबोध्य क्षामांगीं चकितनयनां स्मेरवदनां

रम्य । अधुना द्वितीयेऽह्नि । आपि प्राप्ता । कर्मणि लुङ् । कमलादपि तव मुखमधिकशोभामिति भावः ।

(१५०) नायिकां प्रत्युक्तिः । अधुनैव न तु कालांतरे । कलय जानीहि । हंत हर्षे । मंदस्मितमधुरं तव मुखं निःसंशयं चंद्रं जेष्यतीति भावः ।

(१५१) मत्तस्वभाववर्णनमिदम् । शनैरित्यनेनाव्यक्तत्वं किमपीत्यनेन चासंगतत्वं गम्यते । कोकनदयन् कोकनदं कुर्वन् । त्रिलोकीं कोकनदमिव रक्तवर्णां पश्यन्नित्यर्थः । आलंबनशून्यमलक्षितविषयविशेषम् । क्षीवो मत्तः । अत्र सुरापानमत्तपुरुषगतो मदो प्राधान्येन व्यंग्यः । स्वभावोक्तिश्च तदुपस्कारिका ।

(१५२) सुराक्षीवस्य कस्यचिदुक्तिरियम् । अत्रापि मद एव व्यंग्यः । चतुर्थपादेऽधिकवर्णोच्चारणं मदकार्यम् । पूर्वार्धगता आम्योक्तिरुत्तरार्धे तरुणीकरेंऽबुजोपमेयतया निरूपणीये स्वकरस्य तदुपमेयतया निरूपणं च मदमेव पोषयतः ।

150–152–Omitted in C, E, F;

Digitized by Google

सनिःश्वासं श्लिष्यत्यहह सुकृती राजरमणीम्॥१५३॥
गुंजंति मंजु परितो गत्वा धावंति संमुखम् ।
आवर्तंते विवर्तंते सरसीषु मधुव्रताः ॥ १५४॥
यथा यथा तामरसेक्षणा मया
पुनः सरागं नितरां निषेविता ।
तथा तथा तत्कथेव सर्वतो
विकृष्य मामेकरसं चकार सा ॥ १५५ ॥
हरिणीप्रेक्षणा यत्र गृहिणी न विलोक्यते ।
सेवितं सर्वसंपद्भिरपि तद्भवनं वनम् ॥ १५६ ॥
लोलालकावलिचलन्नयनारविंद-
लीलावशंवदितलोकविलोचनायाः ।
सायाहनि प्रणयिनो भवनं व्रजंत्या-

---

(१५३) राजरमणीमुपभुक्तवतः कस्यचिद्वर्णनमिदम् । सुधाफेन इवामृत-फेन इव स्वच्छे । चकितनयनामित्यनेनांतःपुरे परपुरुषागमनस्यात्यंतासंभावनयाऽऽकस्मिकबोधजनितत्रासो व्यज्यते । स्मेरवदनामित्यनेन च मत्प्रियो मदर्थं प्राणानपि तृणीकृत्यागत इति ज्ञानजन्यो हर्षः । अयं शृंगाराभासोऽनुचितप्रणयाया राजरमण्या आलंबनत्वात् ।

(१५४) अयं वस्तुध्वनिः । अत्र मधुव्रतकर्तृकमंजुगुंजनादिभिर्वस्तुभिरासन्नसरसिजोत्पत्तिध्वननद्वारा शरदागमनैकत्वरूपं वस्तु व्यज्यते ।

(१५५) नायकोक्तिः । तामरसेक्षणा कमलनयना । एकरसं तदेकरतचित्तम् ।

(१५६) सर्वसंपद्भिः सेवितं सकलसंपत्तिपरिपूर्णम् ।

(१५७) लोलालकावल्याश्चलन्नयनारविंदस्य च लीलया वशंवदितानि

153—157—Omitted in C, E, F.

Digitized by Google

श्वेतो न कस्य हरते गतिरंगनायाः ॥ १५७ ॥

दंतांशुकांतमरविंदरमापहारि
सांद्रामृतं वदनमेणविलोचनायाः ।
वेधा विधाय पुनरुक्तमिवेंदुबिंबं
दूरीकरोति न कथं विदुषां वरेण्यः ॥ १५८ ॥

सानुकंपाः सानुरागाश्चतुराः शीलशीतलाः ।
हरंति हृदयं हंत कांतायाः स्वांतवृत्तयः ॥ १५९ ॥

अलकाः फाणिशावतुल्यशीला
नयनांताः परिपुंखितेषुलीलाः ।
चपलोपमिता खलु स्वयं या
बत लोके सुखसाधनं कथं सा ॥ १६० ॥

वदने तव यत्र माधुरी सा

स्वाधीनीकृतानि लोकविलोचनानि यया तस्याः । सायाह्नि सायंकाले ।

(१५८) दंतांशुभी रदनप्रभाभिः कांतं मनोज्ञम् । रमा शोभा । सांद्रं घनममृतं यस्मिंस्तत् । एणविलोचनाया हरिणनयनायाः । वेधा विधिः । पुनरुक्तमिव व्यर्थमिव । वरेण्यः श्रेष्ठः । चंद्रप्रयोजनं सकलमेव मुखेनैव साध्यतेऽतो विधिरिदुबिंबं किमर्थं न दूरीकरोतीति न ज्ञायत इति भावः ।

(१५९) मायकोक्तिरियम् । शीलं पातिव्रत्यम् । हृदयं ममेति शेषः ।

(१६०) फाणिशावतुल्यशीलाः सर्पशिशुसदृशस्वभावाः । नयनांता नेत्रप्रांताः । परिपुंखितेषुलीलाः सपुंखबाणसदृशलीलाः । चपलया विद्युतोपमिता । या कामिनी । यासामेतादृशः परिवारो याश्च स्वयं विद्युच्चंचलास्ताः कामिन्यो लोके कथं सुखसाधनत्वेन ग्राह्या इति भावः ।

(१६१) नायिकां प्रत्युक्तिः । सा पूर्वानुभूता । कोमले हृदीत्यन्वयः ।

158—160—Omitted in C, E, F.

Digitized by Google

हृदि पूर्णा करुणा च कोमलेऽभूत् ।
अधुना हरिणाक्षि हा कथं वा
गतिरन्यैव विलोक्यते गुणानाम् ॥ १६१ ॥
अनिशं नयनाभिरामया
रमया संमदिनो मुखस्य ते ।
निशि निःसरदिंदिरं कथं
तुलयामः कलयापि पंकजम् ॥ १६२ ॥
अंगैः सुकुमारतरैः सा कुसुमानां श्रियं हरति ।
विकलयति कुसुमबाणो बाणालीभिर्मम प्राणान्॥१६३॥
खिद्यति सा पथे यांती कोमलचरणा नितंबभारेण ।
खिद्यामि हंत परितस्तद्रूपविलोकनेन विकलोऽहम्॥१६४॥

वाऽत्र वाक्यालंकारे । गुणानामन्यैव गतिर्विलोक्यते माधुर्यकरुणयोः स्थाने यथाक्रमं कटुता कठोरता चाविर्भूता दृश्यते ।

(१६२) नायकस्य नायिकां प्रत्युक्तिः । अनिशं सर्वदा । नयनाभिरामया नेत्रयोः प्रीतिजनकया । रमया शोभया । संमदिनो गर्वभाजः । निशि रात्रौ । निःसरदिंदिरं विगतशोभम् । कलयाप्येकांशेनापि । अयं व्यतिरेकालंकारः ।

(१६३) नायकोक्तिः। अंगैरवयवैः । सुकुमारतरैरत्यंतकोमलैः । सा कामिनी । कुसुमबाणः पुष्पशरो मदनः । अयमसंगत्यलंकारः । विरुद्धत्वेनापाततो भासमानं हेतुकार्ययोर्वैयधिकरण्यमसंगतिः । अस्मिन् पद्ये कामिन्या स्वास्वभूतकुसुमश्रीहरणात्तस्यामेव युक्तो दंडो मदनेन नायके नियुक्त इति हेतुकार्ययोर्वैयधिकरण्यम् । एतादृशं वैयधिकरण्यं न वस्तुतः संभवतीति स्पष्टमेव ।

(१६४) नायकोक्तिः । सा नायिका । हंत खेदे । परितः समंततः । विकलो निश्चेष्टः ।

161–Omitted in C. E. F

Digitized by Google

मथुरागमनोन्मुखे मुरारा-
वसुभारार्तिभृतां व्रजांगनानाम् ।
प्रलयज्वलनायते स्म राका
भवनाकाशमजायतांबुराशिः ॥ १६५ ॥
केलीमंदिरमागतस्य शनकैरालीरपास्येंगितैः
सुप्तायाः सरुषः सरोरुहदृशः संवीजनं कुर्वतः ।
जानंत्याप्यनभिज्ञयेव कपटव्यामीलिताक्ष्या सखि
श्रांतासीत्यभिधाय वक्षसि तया पाणिर्ममासंजितः॥१६६॥
मांथर्यमाप गमनं सह शैशवेन
रक्तं सहैव मनसाऽधरबिंबमासीत् ।

---

(१६५) मुरारौ श्रीकृष्णे । असुभारार्तिभृतां प्राणभारपीडामावहंतीनाम् । व्रजांगनानां गोकुलकामिनीनाम् । प्रलयज्वलनायते स्म प्रलयकालीनदहन इवाभवत् । भवनाकाशं भवनप्रदेशः । दुःखार्त्ताः पूर्णिमां प्रलयज्वलनं भवनप्रदेशं च समुद्रममन्यंतेत्यर्थः ।

(१६६) नायकस्य सखायं प्रत्युक्तिः । केलीमंदिरमागतस्येंगितैरालीरपास्य सरोरुहदृशः संवीजनं कुर्वतो मम पाणिस्तया सखि श्रांतासीत्यभिधाय वक्षस्यासंजित इत्यन्वयः । अपास्य दूरीकृत्य । इंगितैर्ह्रद्गतभावद्योतकैश्चेष्टितैः । सुप्ताया व्याजनिद्रितायाः । सरुषो रुष्टायाः । संवीजनं कुर्वतो व्यजनादिना वायुसंचारणं कुर्वतः । जानंत्याप्ययं प्रिय आगत्य संवीजनं करोति नेयं सखीत्यभिज्ञयापि । अनभिज्ञयेवाज्ञानमिषं कुर्वत्या । वक्षस्यात्मन इति शेषः । तया भामिन्या । आसंजितः स्थापितः । अत्र भामिन्या रोषनिवारणाय यत्ने क्रियमाणे रोषनिवारणादप्यधिकतरसुखप्रदः कामुकेन तत्कुचाधिकरणकः स्वकरासंगो लब्ध इति प्रहर्षणालंकारोऽयम् । अस्मदवलोकितेषु सर्वेष्वेव पुस्तकेषु जानंत्येति पाठो वर्तते । जानत्येति शुद्धं रूपमिति भाति ।

(१६७) मांथर्यं मंदत्वम् । शैशवेन बाल्येन । रक्तं ताम्रवर्णमनुरागयुक्तं

Digitized by Google

किं चाभवन्मृगकिशोरदृशो नितंबः
सर्वाधिको गुरुरयं सह मन्मथेन ॥ १६७ ॥
श्वासोऽनुमानवेद्यः शीतान्यंगानि निश्चला दृष्टिः ।
तस्याः सुभग कथेयं तिष्ठतु तावत्कथांतरं कथय॥ १६८॥
पाणौ कृतः पाणिरिलासुतायाः
सस्वेदकंपो रघुनंदनेन ।
हिमांबुझंझानिलविह्वलस्य
प्रभातपद्मस्य बभार शोभाम् ॥ १६९ ॥
अरुणमपि विद्रुमद्रुं मृदुलतरं चापि किसलयं बाले ।
अधरीकरोति नितरां तवाधरो मधुरिमातिशयात्॥१७०॥
सुदृशो जितरत्नजालया
सुरतांतश्रमबिंदुमालया ।

च । मृगकिशोरदृशो हरिणशावाक्ष्याः । गुरुर्विस्तृतो महांश्च । इयं सहोक्तिः ।

(१६८) नायकं प्रति विरहपीडितां नायिकामधिकृत्य कस्यचिदुक्तिः । अनुमानवेद्योऽनुमानेनैव ज्ञेयः । अतितनुरित्यर्थः । तस्या नायिकायाः । कथांतरं कथयान्यत् किंचित्कथय । अत्र नायिकासंबंधिन्या वार्तायाः अंशं कथयित्वा क्रियमाणो निषेधो वक्ष्यमाणमरणवार्तायाः दुःसहत्वं व्यनक्ति । अयमाक्षेपः केषांचिन्मते ।

(१६९) पाणौ कृतः पाणिना गृहीतः । इलासुतायाः सीतायाः । सस्वेदकंपस्तत्कालजनितस्वेदकंपवान् । हिमांबुना झंझानिलेन च विव्हलस्य । झंझानिलो महान् वायुः । इयं पदार्थनिदर्शना ।

(१७०) नायकोक्तिः । विद्रुमद्रुं प्रवालदंडम् । अधरीकरोति नीचीकरोति । अयं व्यतिरेकालंकारः ।

(१७१) सुरतश्रांतायाः कांताया वर्णनम् । जितरत्नजालया पराभूतरत्नसमूहया । अलिकेन ललाटेन । हेमकांतिना सुवर्णरुचिरेण । काप्य-

Digitized by Google

अलिकेन च हेमकांतिना
विदधे काऽपि रुचिः परस्परम् ॥ १७१ ॥
परपूरुषदृष्टिपातवज्रा-
हतिभीता हृदयं प्रियस्य सीता ।
अविशत् परकामिनीभुजंगी-
भयतः सत्वरमेव सोऽपि तस्याः ॥ १७२ ॥
अंगानि दत्वा हेमांगि प्राणान् क्रीणासि चेन्नृणाम् ।
युक्तमेतन्न तु पुनः कोणं नयनपद्मयोः ॥ १७३ ॥
जितमौक्तिकसंपदां रदानां
सहवासेन परां मुदं दधानाम् ।
विरसादधरीकरोति नासा-
मधुना साहसशालि मौक्तिकं ते ॥ १७४ ॥

निर्वचनीया । रुचिः शोभा । अयमन्योन्यालंकारः । द्वयोरन्योन्ये-नान्योन्यस्य विशेषाधानमन्योन्यम् ।

(१७२) हृदयं वक्षःस्थलम् । प्रियस्य रामस्य । सोऽपि रामोऽपि । त-स्याः सीताया हृदयमविशदित्यनुषंगः । इदमप्यन्योन्यम् ।

(१७३) कस्यचित्कांचित्कामिनीं प्रत्युक्तिः । हेमांगि सुवर्णगौरांगि । अंगानि दत्वा प्राणान् क्रीणासि चेदेतद्युक्तं नयनपद्मयोः कोणं दत्वा तु प्राणान् क्रीणासि चेदेतत्पुनर्न युक्तमित्यर्थः । अयं परिवृत्त्यलंकारः ।

(१७४) नायिकां प्रत्युक्तिः । रदानां सहवासेन परां मुदं दधानां नासां मौक्तिकमधरीकरोतीत्यन्वयः । विरसाद्वैरस्यात् । भावप्रधानो निर्देशः । अधरीकरोति नीचीकरोति । शिरसि पदं धत्त इति भावः । साहस-शालि विषमाध्यवसायमग्रम् । मौक्तिकमर्थान्नासामौक्तिकम् । अत्र स्वजातीयपराभवं कुर्वतां दंतानां विक्रियामुत्पादयितुमसमर्थं नासा-मौक्तिकं दंतसंबंधिन्या नासाया विक्रियां जनयतीति वर्णनात्प्रत्यनी-कालंकारोऽयम् । प्रतिपक्षसंबंधिनस्तिरस्कृतिः प्रत्यनीकम् ।

Digitized by Google

विलसत्याननं तस्या नासाग्रस्थितमौक्तिकम् ।
आलक्षितबुधाश्लेषं राकेंदोरिव मंडलम् ॥ १७५ ॥
निभाल्य भूयो निजगौरिमाणं
मा नाम मानं सहसैव यासीः ।
गृहे गृहे पश्य तवांगवर्णा
मुग्धे सुवर्णावलयो लुठंति ॥ १७६ ॥
करिकुंभतुलामुरोजयोः
क्रियमाणां कविभिर्विशृंखलैः ।
कथमालि शृणोषि सादरं
विपरीतार्थविदो हि योषितः ॥ १७७ ॥
परिष्वजन् रोषवशात् तिरस्कृतः
प्रियो मृगाक्ष्या शयितः पराङ्मुखः ।

---

(१७५) तस्या नायिकायाः । आलक्षितबुधाश्लेषं दृष्टबुधग्रहासंगम् । राकेंदोः पूर्णिमाचंद्रस्य ।

(१७६) निभाल्य सादरं दृष्ट्वा । गौरिमाणं गौरत्वम् । लुठंत्यनादृता एव पतंति । प्रतीपालंकारः ।

(१७७) नायिकां प्रत्युक्तिः । करिकुंभतुलां गजगंडोपमाम् । उरोजयोः स्तनयोः । विशृंखलैर्निरंकुशैः । सादरश्रवणमनुचितं यतो द्वयोस्तुल्यतैव न संभवतीति भावः । चतुर्थपादोऽमुमेवार्थं पुष्णाति । विपरीतार्थविदोऽयथार्थज्ञानवत्यः । योषितः स्त्रियः । स्त्रीस्वभावसुलभया भ्रांत्यैव त्वमिदं सादरं शृणोषीति तात्पर्यम् । इदमर्थांतरन्यासानुविद्धं प्रतीपम् ।

(१७८) परिष्वजन्नालिंगन् । मृगाक्ष्या तिरस्कृत इत्यन्वयः । असौ प्रियः । कांदिशीकया भयाद्वृताचित्तया । सस्वज आलिंगितः । अत्र

175–Omitted in C. D E. F.

Digitized by Google

किं दुःखितोऽसाविति कांदिशीकया
कयाचिदाचुंब्य चिराय सस्वजे ॥ १७८ ॥
चेलांचलेनाननशीतरश्मिं
संवृण्वतीनां हरिदश्वरीणाम् ।
व्रजांगनानां स्मरजातकंपा-
दकांडसंपातमियाय नीवी ॥ १७९ ॥
अधरेण समागमाद्रदाना-
मरुणिम्ना पिहितोऽपि शुक्लभावः ।
हसितेन सितेन पक्ष्मलाक्ष्याः
पुनरुल्लासमवाप जातपक्षः ॥ १८० ॥
सरसिरुहोदरसुरभावधरितबिंबाधरे मृगाक्षि तव ।

नायकस्य यत्नं विनैवेष्टार्थलाभात्प्रहर्षणालंकारः ।

(१७९) चेलांचलेन वस्त्रप्रांतेन । आननशीतरश्मिं मुखचंद्रम् । संवृण्वतीनामाच्छादयंतीनाम् । हरिदश्वरीणां कृष्णं दृष्टवतीनाम् । स्मरजातकंपान्मदनजनितकंपात् । अकांडसंपातमाकस्मिकविस्रंसम् । नीवी वसनग्रंथिः । श्रीकृष्णं विलोक्य लज्जावशान्मुखमावृण्वतीनां गोपीनां नीवी सात्विककंपादकस्मादेव स्रस्तेत्यर्थः । अयमिष्टार्थविरुद्धलाभाद्विषादनालंकारः ।

(१८०) समागमात्सहवासात् । रदानां शुक्लभाव इत्यन्वयः । अरुणिम्नाऽरुणवर्णेन पिहितोप्याच्छादितोऽपि । शुक्लभावः श्वेतवर्णः । सितेन शुभ्रेण । उल्लासमवाप पुनः प्रादुरभूत् । जातपक्षः संजातसहायः । हसितं शुभ्रमिति कविसमयः । अयं तद्गुणः । स्वगुणत्यागपूर्वकं संनिहितवस्त्वंतरगुणग्रहणं तल्लक्षणम् ।

(१८१) प्रियेण तांबूलं कुतो न गृह्णासीत्युक्त एतावंतं समयं तांबूलानि भुक्त्वैव समागतास्मीत्युक्तवतीं प्रति तस्येयमुक्तिः । अधारितबिंबस्तिरस्कृतबिंबफलोऽधरो यस्य तस्मिन् । इदं वदनविशेषणम् । मणिरदने

Digitized by Google

वद वदने मणिरदने तांबूलं केन लक्षयेम वयम् ॥१८१॥
शयिता सविधेऽप्यनीश्वरा
सफलीकर्तुमहो मनोरथान् ।
दयिता दयिताननांबुजं
दरमीलन्नयना निरीक्षते ॥ १८२ ॥
वदनारविंदसौरभ- लोभादिंदिंदिरेषु निपतत्सु ।
मध्यधरार्थिनि सुदृशो दृशो जयंत्यतिरुषा परुषाः ॥१८३॥

इति श्रीपंडितराजजगन्नाथनिर्मिते भामिनीविलासे
शृंगारविलासः ।

मणिसदृशदंते । तांबूलभुक्तिलिंगसदृशानि लिंगानि सहजान्येव तव वदने वर्ततेऽतः कथमस्माभिस्तांबूलभुक्तिरनुमेयेति भावः । अत्र पूर्वोक्तलक्षणो मीलितालंकारः ।

(१८२) शृंगारध्वनिरयम् । सविधेऽपि पतिसमीपेऽपि । अनीश्वराऽसमर्था । लज्जावशादिति बोध्यम् । सफलीकर्तुं सफलान् कर्तुम् । मनोरथानालिंगनचुंबनाद्यभिलाषान् । दरमीलन्नयनेषत्संकुचितनेत्रा । अत्र नेत्रयोर्दरमीलनेन नायिकागता त्रपाऽभिव्यज्यते निरीक्षणेन च रतिः ।

(१८३) इंदिंदिरेषु भ्रमरेषु । अधरार्थिन्यधरपानं प्रार्थितवति । सुदृशो भामिन्याः । दृशो दृक्पाताः । अतिरुषाऽतिक्रोधेन । परुषाः कर्कशाः । भ्रमरपीडावत्यां नायिकायामधरपानार्थनाऽधिकपीडादानेन रोषोत्पादिका ।

इति भामिनीविलासव्याख्यायां काव्यमर्मप्रकाशाख्यायां
शृंगारविलासः ।

Digitized by Google

अथ भामिनीविलासे करुणविलासः ।
दैवे पराग्वदनशालिनि हंत जाते
यातेषु संप्रति दिवं प्रति बंधुरत्ने ।
कस्मै मनः कथयितासि निजामवस्थां
कः शीतलैः शमयिता वचनैस्तवाधिम् ॥ १ ॥
प्रत्युद्गता सविनयं सहसा पुरेव
स्मेरैः स्मरस्य सचिवैः सरसावलोकैः ।
मामद्य मंजुरचनैर्वचनैश्च बाले
हा लेशतोऽपि न कथं शिशिरीकरोषि ॥ २ ॥
सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता
विद्याऽपि खेदकलिता विमुखीबभूव ।
सा केवलं हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव ॥ ३ ॥
निर्वाणमंगलपदं त्वरया विशंत्या
मुक्ता दयावति दयाऽपि किल त्वयाऽसौ ।

---

(१) प्रमीतां स्वप्रियामुद्दिश्य कस्यचिच्छोकोक्तिरस्मिन् विलास उपनिबद्धा । पराग्वदनशालिनि पराङ्मुखे । प्रतिकूल इति यावत् । बंधुरत्ने कलत्ररूपे । मन इति संबोधनम् । कथयितासि कथयिष्यसि शमयिता शमयिष्यति ।

(२) प्रत्युद्गताऽभिमुखमागता । सहसाऽकस्मात् । पुरेव प्रागिव । स्मेरैः स्मितयुक्तैः । स्मरस्य सचिवैर्मदनस्य सहायैः । कामोद्दीपकैरिति यावत् । सरसावलोकैः सप्रणयवीक्षणैः । हा खेदे । शिशिरीकरोषि शीतलयसि ।

(३) विषया इंद्रियार्थाः । खेदकलिता खेदव्याप्ता ।

(४) निर्वाणमंगलपदं मोक्षरूपानपायस्थानम् । निभालयसि पश्यसि ।

Digitized by Google

यन्मां न भामिनि निभालयसि प्रभात-
नीलारविंदमदभंगिमदैः कटाक्षैः ॥ ४ ॥
कृत्वा पदस्खलनभीतिवशात् करं मे
या रूढवत्यसि शिलाशकलं विवाहे ।
सा मां विहाय कथमद्य विलासिनि द्या-
मारोहसीति हृदयं शतधा प्रयाति ॥ ५ ॥
निर्दूषणा गुणवती रसभावपूर्णा
सालंकृतिः श्रवणकोमलवर्णराजिः ।
सा मामकीनकवितेव मनोऽभिरामा
रामा कदापि हृदयान्मम नापयाति ॥ ६ ॥
चिंता शशाम सकलाऽपि सरोरुहाणा-
मिंदोश्च बिंबमसमां सुषमामयासीत् ।
अभ्युद्गतः कलकलः किल कोकिलानां

प्रभातनीलारविंदमदभंगी प्रातःस्फुरादिंदीवरभंजको मदो येषां तैः ।

(५) आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव ।
प्रमृणीहि दुरस्यून् सहस्व पृतनायतः ॥
इति मंत्रेण विवाहविधौ वधूर्वरहस्तमवलब्ध्यं पाषाणखंडमारोप्यत इत्यर्थं मनसिकृत्य कविनेदं पद्यं रचितामित्यवधेयम् । द्यां स्वर्गम् ।

(६) अत्र श्लिष्टविशेषणद्वारा प्रिया स्वकवितयोपमीयते । निर्दूषणा दौःशील्यादिदोषरहिता श्रुतिकटुत्वादिकाव्यदोषरहिता च । गुणवती दयादाक्षिण्यादिगुणयुता माधुर्यादिकाव्यगुणयुता च । रसभावपूर्णा शृंगारेण प्रीत्या च पूर्णा शृंगारादिरसैः श्रितामोहादिव्यभिचारिभिश्च पूर्णा । सालंकृतिः कटककुंडलादियुतोपमादियुता च । श्रवणयोः कर्णयोः कोमला वर्णराजिः शब्दपंक्तिः काव्यघटकवर्णपंक्तिश्च यस्याः सा ।

(७) चिंता पराभवभीतिः । असमामतुलाम् । अभ्युद्गतोऽभ्युदयं प्राप्तः ।

Digitized by Google

प्राणप्रिये यदवधि त्वमितो गताऽसि ॥ ७ ॥
सौदामिनीविलसितप्रतिमानकांडे
दत्वा कियंत्यपि दिनानि महेंद्रभोगान् ।
मंत्रोज्झितस्य नृपतेरिव राज्यलक्ष्मी-
र्भाग्यच्युतस्य करतो मम निर्गताऽसि ॥ ८ ॥
केनापि मे विलसितेन समुद्गतस्य
कोपस्य किं नु करभोरु वशंवदाऽभूः ।
यन्मां विहाय सहसैव पतिव्रताऽपि
याताऽसि मुक्तिरमणीसदनं विदूरम् ॥ ९ ॥
काव्यात्मना मनसि पर्यणमन् पुरा मे
पीयूषसारसरसास्तव ये विलासाः ।
तानंतरेण रमणी रमणीयशीले
चेतोहरा सुकविता भविता कथं नः ॥ १० ॥

---

(८) सौदामिनीविलसितप्रतिमान् महेंद्रभोगान् कियंत्यपि दिनानि दत्वाऽ कांडे भाग्यच्युतस्य मम करतो निर्गतासीत्यन्वयः । सौदामिनीविलसितप्रतिमान् विद्युद्विलाससदृशान् । अतीवास्थिरानिति यावत् । महेंद्रभोगान् महेंद्रयोग्योपभोगान् । कियंत्यपि दिनान्यल्पकालम् । कालाध्वनोरत्यंतसंयोग इति द्वितीया । मंत्रोज्झितस्य राजमंत्रेण त्यक्तस्य । भाग्यच्युतस्य दैवहीनस्य ।

(९) केनाप्यनुचितेन । विलसितेन चेष्टितेन । समुद्गतस्य समुत्थितस्य । करभोरु करभसदृशोरु । करस्य मांसलो बहिर्भागः करभः । वशंवदाऽधीना । सहसैवाकस्मादेव । पतिव्रताऽपीत्यत्रापिना पतिव्रतया पतित्यागोऽनुचित एवेति सूचितम् । मुक्तिरमणीसदनं मुक्तिसखीगेहम् । मोक्षपदमित्यर्थः ।

(१०) काव्यात्मना काव्यरूपेण । पर्यणमन् परिणता अभूवन् । तानंतरेण तैर्विना । चेतोहरा मनोहरा ।

Digitized by Google

या तावकीनमधुरास्मितकांतिकांते
भूमंडले विफलतां कविषु व्यतानीत् ।
सा कातराक्षि विलयं त्वयि यातवत्यां
राकाऽधुना वहति वैभवमिंदिरायाः ॥ ११ ॥
मंदास्मितेन सुधया परिषिच्य या मां
नेत्रोत्पलैर्विकसितैरनिशं समीजे ।
सा नित्यमंगलमयी गृहदेवता मे
कामेश्वरी हृदयतो दयिता न याति ॥ १२ ॥
भूमौ स्थिता रमण नाथ मनोहरेति
संबोधनैर्यमधिरोपितवत्यसि द्याम् ।
स्वर्गं गता कथमिव क्षिपसि त्वमेण-
शावाक्षि तं धरणिधूलिषु मामिदानीम् ॥ १३ ॥

---

(११) तावकीनस्य मधुरस्मितस्य कांत्या कांते कमनीये । कविषु विफलतां व्यतानीत्कविभिर्निष्फलत्वेनागृह्यत । शुभ्रत्ववर्णनप्रस्तावे तव स्मितमुत्कृष्टमुपमानमुपलभ्य कवयो राकां निष्प्रयोजनाममन्यंतेति भावः । कातराक्ष्यधीरनयने । राका पूर्णिमारात्रिः । इंदिराया वैभवं वहति साक्षाल्लक्ष्म्या एव समृद्धिसौभाग्यं प्राप्नोति ।

(१२) मंदस्मितेन सुधयेत्यत्राभेदेनान्वयः । तेन मंदस्मिताभिन्नया सुधयेत्यर्थः । परिषिच्य स्नपयित्वा । नेत्रोत्पलैर्नेत्ररूपकमलैः । समीजेऽर्चितवती । नित्यमंगलमयी सततमंगलरूपा । अत्र स्मितसुधया सेचनं नेत्रकमलैः पूजनं च मंगलत्वेनाभिप्रेतम् । गृहदेवता गृहाधिष्ठात्री देवता । कामेश्वरी कामपूरणे समर्था ।

(१३) भूमिस्थाऽपि त्वं यं रमणेत्यादिभिः संबोधनैर्द्यामधिरोपितवत्यासि तं मामधुना स्वयं स्वर्गं गतापि धरणिधूलिषु क्षिपसीत्यत्यंतानुचितमिदमिति तात्पर्यार्थः । संबोधनैरामंत्रणैः । द्यामधिरोपितवत्यसि स्वर्गं प्रापितवत्यसि । स्वर्गारोहणसुखमनुभावितवत्यसीति यावत् । तं मामि-

Digitized by Google

लावण्यमुज्ज्वलमपास्ततुलं च शीलं
लोकोत्तरं विनयमर्थमयं नयं च ।
एतान् गुणानशरणानथ मां च हित्वा
हा हंत सुंदरि कथं त्रिदिवं गताऽसि ॥ १४ ॥
कांत्या सुवर्णवरया परया च शुद्धया
नित्यं स्विकाः खलु शिखाः परितः क्षिपंतीम् ।
चेतोहरामपि कुशेशयलोचने त्वां
जानामि कोपकलुषो दहनो ददाह ॥ १५ ॥
कर्पूरवार्तीरिव लोचनतापहंत्री
फुल्लांबुजस्रगिव कंठसुखैकहेतुः ।
चेतश्चमत्कृतिपदं कवितेव रम्या
नम्या नरीभिरमरीव हि सा विरेजे ॥ १६ ॥
स्वप्नांतरेऽपि खलु भामिनि पत्युरन्यं

त्यन्वयः । धरणिधूलिषु क्षिपसि निजगमनेन शोकदानादिति शेषः । त्वां विनाऽहं धूलिषु पतित्वा रोदिमीति भावः ।

(१४) अपास्ततुलमनुपमम् । शीलं वृत्तम् । विनयं नम्रभावम् । अर्थमयं नयं प्रचुरार्थां नीतिम् । एतान् गुणानशरणान् हित्वा मां चाशरणं हित्वेत्यन्वयः । एतान् लावण्यादीन् ।

(१५) सुवर्णवरया सुवर्णादप्युत्कृष्टया । परया श्रेष्ठया । स्विकाः स्वकीयाः । अर्थाद्दहनस्य । शिखा ज्वालाः । क्षिपंतीमभिभवंतीम् । कुशेशयलोचने कमलनेत्रे ।कोपकलुषस्त्वया कांतिशुद्धिभ्यां जितत्वात्प्राप्तरोषः ।

(१६) कर्पूरवर्तीरिव घनसारचूर्णमिव । फुल्लांबुजस्रक् प्रफुल्लकमलमाल । चेतश्चमत्कृतिपदं चित्तचमत्कारहेतुः । नरीभिर्नारीभिः । अमरीवाप्सरा इव । विरेजे रराज ।

(१७) स्वप्नांतरेऽपि स्वप्नावस्थायामपि । कंचन पुरुषमिति शेषः साभिलाषमिति क्रियाविशेषणम् । गुणैर्विहीनं विनयादिगुणशून्यं ।सत्वरजस्तमोगु-

Digitized by Google

या दृष्टवत्यसि न कंचन सामिलाषम् ।
सा संप्रति प्रचलिताऽसि गुणैर्विहीनं
प्राप्तुं कथं कथय हंत परं पुमांसम् ॥ १७ ॥
दयितस्य गुणाननुस्मरंती
शयने संप्रति या विलोकिताऽऽसीत् ।
अधुना किल हंत सा कृशांगी
गिरमंगीकुरुते न भाषिताऽपि ॥ १८ ॥
रीतिं गिराममृतदृष्टिकरीं तदीयां
तां चाकृतिं कविवरैरभिनंदनीयाम् ।
लोकोत्तरामथ कृतिं करुणास्सार्द्रां
स्तोतुं न कस्य समुदेति मनःप्रसादः ॥ १९ ॥
इति श्रीपंडितराजजगन्नाथविरचिते भामिनीविलासे
करुणाविलासः

णरहितं च। हंतेति खेदे । परं पुमांसं परपुरुषं परमात्मानं च । अयं श्लेषमूलको विरोधाभासः । अत्र स्वप्नेऽपि परपुरुषमदृष्टवती त्वं गुणैर्विहीनं परं पुमांसं प्राप्तुं प्रचलितासीति भासमानस्य विरोधस्य श्लिष्टार्थवशात्परिहारो भवति ।

(१८) दयितस्य मम । संप्रति मरणसमयेऽपि । अमेन पदेन चरमावस्थायामपि तस्या दयितगुणविस्मरणं नाभूदिति वस्तु व्यज्यते । हंत खेदे । गिरं नांगीकुरुते न प्रतिवदति । भाषिताऽप्युक्ताऽपि ।

(१९) गिरां रीतिं भाषणपरिपाटीम् । अमृतदृष्टिकरीं सुधाष्ठावनकरीम् । अथ च । करुणारसार्द्रां कृतिं करुणापरिपूर्णां कृत्यपरिपाटीम् । अत्र कविना स्वकृतिरपि कटाक्षितेति भाति ।

इति भामिनीविलासव्याख्यायां काव्यमर्मप्रकाशाख्यायां
करुणविलासः

18–Omitted in C.

Digitized by Google

अथ भामिनीविलासे शांतविलासः

विशालविषयाटवीवलयलग्नदावानल-
प्रसृत्वरशिखावलीविकलितं मदीयं मनः ।
अमंदमिलदिंदिरे निखिलमाधुरीमंदिरे
मुकुंदमुखचंदिरे चिरमिदं चकोरायताम् ॥ १ ॥
अये जलधिनंदिनीनयननीरजालंबन
ज्वलज्ज्वलनजित्वरज्वरभरत्वराभंगुरम् ।
प्रभातजलजोन्मद्वरिमगर्वसर्वंकषै-
र्जगत्त्रितयरोचनैः शिशिरयाशु मां लोचनैः ॥ २ ॥
स्मृताऽपि तरुणातपं करुणया हरंती नृणा-
मभंगुरतनुत्विषां वलयिता शतैर्विद्युताम् ।

---

(१) विशालं यद्विषयाटवीवलयं संसारारण्यमंडलं तत्र लग्नस्य दावानलस्य या प्रसृत्वराः प्रसरणशीलाः शिखास्तासामावलीभिर्विकलितं वैकल्यं प्राप्तम् । अमंदं मिलंतींदिरा शोभा यस्मिंस्तस्मिन् । मुकुंदमुखचंदिरे श्रीकृष्णवदनचंद्रे । चकोरायतां चकोर इवाचरतु । इदं पद्यं पंडितराजकृतकरुणालहर्यां केषुचित्पुस्तकेषु दृश्यते ।

(२) जलधिनंदिनीनयननीरजालंबन लक्ष्मीनेत्रकमलाश्रय भगवन् विष्णो। ज्वलन् यो ज्वलनो वह्निस्तस्य जित्वरो जेता तस्मादप्यधिकसंतापकरो यो ज्वरभरस्तस्य त्वरया वेगेन भंगुरं भज्यमानम् । प्रभातजलजस्य य उन्नमन्नुद्यन् गारिमा तस्य गर्वस्य सर्वंकषैर्नाशकैः । जगत्त्रितयस्य रोचनैः प्रीतिजनकैः । शिशिरय शीतलं कुरु । अत्र लोचनपदं कटाक्षपरं ग्राह्यमन्यथा बहुवचनस्य निरर्थकत्वात् ।

Digitized by Google

कलिंदगिरिनंदिनीतटसुरद्रुमालंबिनी
मदीयमतिचुंबिनी भवतु काऽपि कादंबिनी ॥ ३ ॥
कलिंदगिरिनंदिनीतटवनांतरं भासयन्
सदा पथि गतागतश्रमभरं हरन् प्राणिनाम् ।
लतावलिशतावृतो मधुरया रुचा संभृतो
ममाशु हरतु श्रमानतितरां तमालद्रुमः ॥ ४ ॥
जगज्जालं ज्योत्स्नामयनवसुधाभिर्जटिलय-
ञ्जनानां संतापं त्रिविधमपि सद्यः प्रशमयन् ।
श्रितो वृंदारण्यं नतनिखिलवृंदारकवृतो
मम स्वांतध्वांतं तिरयतु नवीनो जलधरः ॥ ५ ॥

---

(३) व्यतिरेकातिशयोक्त्योरंगांगिभावसंकरोऽयम् । अत्र कादंबिनीत्वेनाध्यवसितायाः कृष्णमूर्तेरितरमेघमालात आधिक्यं वर्णितम् । तरुणातपं चंडातपम् । इतरमेघमाला दृष्टा वर्षणद्वारा स्पृष्टा वा तापं हरतीयं तु स्मृताऽपि । इतरमेघमाला भंगशीलतनुकांतिविद्युता वेष्टितेयं तु चिरकालस्थायिशरीरकांतीनां विद्युतां शतैरावृता । अत्र सुरद्रुमशब्दो नीपवाचको यमुनातीरे कल्पवृक्षाणामभावात् । यद्वा । नीपानां सुरद्रुमत्वेनाध्यवसायः । इतरमेघमाला वियदालंबिनीयं तु सुरद्रुमालंबिनी । मतिचुंबिनी मतिविषयः । कापीतरमेघमालाविलक्षणा ।

(४) इयं सावयवातिशयोक्तिः । अत्र भगवतो कृष्णस्य तमालद्रुमत्वेनाध्यवसायः । तदनुग्रहार्थं चोच्चावचयोनिसंचरणस्य पथित्वेन गोपीनां च लतात्वेनाध्यवसितिः । वनांतरं वनमध्यम् । भासयन् दीपयन् । पथि मार्ग उच्चावचयोनिसंचरणे च । गतागतश्रमभरं गमनागमनश्रमभरमेकयोनित्यागपूर्वकापरयोनिप्रवेशश्रमभरं च । रुचा कांत्या । संभृतो युक्तः ।

(५) इयमप्यतिशयोक्तिः । अत्र लोकोत्तरजलधरत्वेन भगवतः प्रतिपा-

5—Omitted in D, E F.

Digitized by Google

ग्रीष्मचंडकरमंडलभीष्म-
ज्वालसंसरणतापितमूर्तेः ।
प्रावृषेण्य इव वारिधरो मे
वेदनां हरतु वृष्णिवरेण्यः ॥ ६ ॥
अपारे संसारे विषमविषयारण्यसरणौ
मम भ्रामं भ्रामं विगालितविरामं जडमतेः ।
परिश्रांतस्यायं तरणितनयातीरनिलयः
समंतात्संतापं हरिनवतमालस्तिरयतु ॥ ७ ॥
आलिंगितो जलधिकन्यकया सलीलं
लग्नः प्रियंगुलतयेव तरुस्तमालः ।

दनम् । लोकोत्तरत्वपोषकाणि च कल्पितानि त्रिविधतापशामकत्वादीनि विशेषणानि । ज्योत्स्नामयनवसुधाभिः कांतिरूपनूतनामृतैः । जाटिलयन् व्याप्नुवन् । त्रिविधमाध्यात्मिकमाधिदैविकमाधिभौतिकं च । सद्यस्तत्कालमेव । वृंदारका देवाः । स्वांतध्वांतं चित्तांधकारम् । तिरयतु नाशयतु । नवीनो लोकोत्तरः ।

(६) ग्रीष्मचंडकरमंडलस्येव ग्रीष्मकालसूर्यबिंबस्येव भीष्मो ज्वालो यस्य तादृशेन संसरणेन संसारेण तापितमूर्तेर्मे । प्रावृषेण्यः प्रावृड्भवः । वेदनां पीडाम् । वृष्णिवरेण्यो वृष्णिकुलश्रेष्ठः कृष्णः ।

(७) अयं परिणामालंकारः । विषयी यत्र विषयात्मतयैव प्रकृतोपयोगी न स्वातंत्र्येण तत्रायमलंकारो भवति । अस्मिन् पद्ये भगवदात्मतयैव तमालस्य संसारतापनिवर्तनक्षमत्वम् । विषमा दुःसंचारा विषयारण्यस्य सरणिर्मार्गो यत्र तस्मिन् । भ्रामं भ्रामं परिश्रांतस्य जडमतेर्ममेत्यन्वयः । विगालितो विरामो यस्मिन् कर्मणि तद् यथा तथा । तरणितनया यमुना ।

(८) जलधिकन्यकया लक्ष्म्या । देहावसानसमये मरणसमये । अरविंदनाभो विष्णुः ।

6–8—Omitted in D, E, F.

Digitized by Google

देहावसानसमये हृदये मदीये
देवश्चकास्तु भगवानरविंदनाभः ॥ ८ ॥
नयनानंदसंदोहतुंदिलीकरणक्षमा ।
तिरयत्वाशु संतापं कापि कादंबिनी मम ॥ ९ ॥
वाचा निर्मलया सुधामधुरया यां नाथ शिक्षामदा-
स्तां स्वप्नेपि न संस्पृशाम्यहमहंभावावृतो निस्त्रपः ।
इत्यागःशतशालिनं पुनरपि स्वीयेषु मां बिभ्रत-
स्त्वत्तो नास्ति दयानिधिर्यदुपते मत्तो न मत्तोऽपरः ॥१०॥
पातालं व्रज याहि वा सुरपुरीमारोह मेरोः शिरः
पारावारपरंपरां तर तथाप्याशा न शांतास्तव ।
आधिव्याधिपराहतो यदि सदा क्षेमं निजं वांछसि
श्रीकृष्णेति रसायनं रसय रे शून्यैः किमन्यैः श्रमैः॥११॥
गणिकाजामिलमुख्यानवता भवता वताहमपि ।

---

(९) नयनानंदस्य यः संदोहो भरस्तस्य तुंदिलीकरणे वर्धने क्षमा समर्था । कादंबिनी कादंबिनीत्वेनाध्यवसिता भगवतः कृष्णस्य मूर्तिः । इयमप्यतिशयोक्तिः ।

(१०) ईश्वरं प्रति कवेरुक्तिः । शिक्षां वेदरूपाम् । अहंभावावृतोऽहंकारेण व्याप्तः । निस्त्रपो निर्लज्जः । आगःशतशालिनमपराधशतकारिणम् । स्वीयेषु बिभ्रतः स्वकीयजनेषु गणयतः । मत्तो मदपेक्षया । इदं पद्यं पंडितराजकृतकरुणालहर्याः केषुचित् पुस्तकेषु दृश्यते ।

(११) आशाग्रस्तं नरं प्रति कवेरुक्तिः । सुरपुरीमिंद्रराजधानीममरावतीम् । पारावारपरंपरां सागरश्रेणीम् । न शांता भविष्यंतीति शेषः । पराहत आक्रांतः । रसायनमौषधम् । रसय सेवस्व । शून्यैर्विफलैः । इदमपि पद्यं पंडितराजकृतकरुणालहर्याः केषुचित् पुस्तकेषु दृश्यते ।

11—Omitted in D, E, F.

Digitized by Google

सीदन् भवमरुगर्ते करुणामूर्ते न सर्वथोपेक्ष्यः ॥ १२ ॥
मृद्वीका रसिता सिता समाशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रंभाधरः खंडितः ।
सत्यं ब्रूहि मदीय जीव भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः ॥ १३ ॥
वज्रं पापमहीभृतां भवगदोद्रेकस्य सिद्धौषधं
मिथ्याज्ञाननिशाविशालतमसस्तिग्मांशुर्बिबोदयः ।
क्रूरक्लेशमहीरुहामुरुतरज्वालाजटालः शिखी
द्वारं निर्वृतिसद्मनो विजयते कृष्णेति वर्णद्वयम् ॥ १४ ॥

---

(१२) नारायणं प्रति कवेर्वाक्यम् । गणिकाजामिलमुख्यान् गणिकाजामिलप्रभृतीन् । गणिका पिंगला नाम काचिद्वारवनिता । अजामिलो नाम कश्चिद्राजा । पिंगलाजामिलयोरुद्धारवृत्तं भागवते प्रसिद्धम् । अवता रक्षता । बतेति खेदे । सीदन् दुःखी । भवमरुगर्ते संसाररूपमरुस्थल्याम् । अत्रोपेक्षाभावे हरेः करुणामूर्तित्वं पोषकम् । कवेः पापिष्ठत्वात्करुणाया अभावे प्राप्ते तत्संपादकं गणिकेत्यादि सीदन्निति च विशेषणम् ।

(१३) मृद्वीका द्राक्षा । रसिता सेविता । सिता खंडशर्करा । समशिता भक्षिता । स्फीतं स्वच्छम् । स्वर्यातेन स्वर्गं गतवता । अधायि पीता । अयं संप्रत्यनुभूयमानः । लक्षितोऽनुभूतः । अत्र जीवे भगवन्नाममाहात्म्यादनेकजन्मवृत्तांताध्यक्षीकरणशक्तिर्बोध्या ।

(१४) पापमहीभृतां पापपर्वतानाम् । भवगदोद्रेकस्य संसारदीर्घरोगस्य । मिथ्याज्ञानमविद्याजन्यज्ञानमेव निशा तत्संबंधि यद्विशालं तमस्तस्य । तिग्मांशुः सूर्यः । क्रूरक्लेशमहीरुहामसह्यक्लेशरूपवृक्षाणाम् । उरुतरज्वालाजटालो दीर्घज्वालाभिर्व्याप्तः । शिखी वह्निः । निर्वृतिसद्मनो मोक्षमंदिरस्य । मालारूपं शुद्धपरंपरितरूपकमिदम् । इदं पद्यं पंडित-

---

12—Omitted in D, E, F.

Digitized by Google

रे चेतः कथयामि ते हितमिदं वृंदावने चारयन्
वृंदं कोऽपि गवां नवांबुदनिभो बंधुर्न कार्यस्त्वया ।
सौंदर्यामृतमुद्रिरद्भिरभितः संमोह्य मंदस्मितै-
रेष त्वां तव वल्लभांश्च विषयानाशु क्षयं नेष्यति ॥१५॥
अव्याख्येयां वितरति परां प्रीतिमंतर्निमग्ना
कंठे लग्ना हरति नितरां यांतरध्वांतजालम् ।
तां द्राक्षाद्यैरपि बहुमतां माधुरीमुद्गिरंतीं
कृष्णेत्याख्यां कथय रसने यद्यसि त्वं रसज्ञा ॥ १६ ॥
संत्येवास्मिन्न् जगति बहवः पक्षिणो रम्यरूपा-
स्तेषां मध्ये मम तु महती वासना चातकेषु ।
यैरध्यक्षैरथ निजसखं नीरदं स्मारयाद्रि-
श्चित्तारूढं भवति किमपि ब्रह्म कृष्णाभिधानम् ॥१७॥
विष्वद्रीच्या भुवनमखिलं भासते यस्य भासा

राजकृतकरुणालहर्याः केषुचित्पुस्तकेषु दृश्यते ।

(१५) कवेः स्वमानसं प्रति वाक्यम् । इदं वक्ष्यमाणम् । वृंदावने गवां वृंदं चारयन्नित्यन्वयः । कोऽप्यर्थाच्छ्रीकृष्णः । नवांबुदनिभो नूतनमेघश्यामः । बंधुः स्नेही । संमोह्य मोहयित्वा । वल्लभान् प्रियान् । विषयान् शब्दादीन् । श्रीकृष्णभक्त्या ज्ञानजननेनाज्ञाननिवर्तनात्तन्मूलको विषयरागो नष्टो भवेदिति भावः ।

(१६) अव्याख्येयामनिर्वचनीयाम् । आंतरमंतःस्थितं ध्वांतजालं गाढांधकारम् । अज्ञानमित्यर्थः । रसने जिव्हे ।

(१७) तेषां पक्षिणाम् । वासनाऽऽदरबुद्धिः । यैश्चातकैः । अध्यक्षैः प्रत्यक्षैः । अथ प्रत्यक्षानंतरम् । निजसखं प्रीतिकारित्वात्स्वमित्रम् । चित्तारूढं स्मृतिविषयम् । अत्र चातकदर्शनेन तन्मित्रभूतस्य मेघस्य मेघस्मरणेन च सादृश्यसंबंधात्कृष्णस्य स्मरणं वर्णितम् । स्मर-

Digitized by Google

सर्वासामप्यहमिति विदां गूढमालंबनं यः ।
तं पृच्छंति स्वहृदयमनावेदिनो विष्णुमन्या-
नन्यायोऽयं शिव शिव नृणां केन वा वर्णनीयः॥१८॥
सेवायां यदि साभिलाषमसि रे लक्ष्मीपतिः सेव्यतां
चिंतायामसि सस्पृहं यदि तदा चक्रायुधश्चिंत्यताम् ।
आलापं यदि कांक्षसि स्मररिपोर्गाथा तदालप्यतां
स्वापं वांछसि चेन्निरर्गलसुखे चेतः सखे सुप्यताम्॥१९
भवग्रीष्मप्रौढातपनिवहसंतप्तवपुषो
बलादुन्मूल्य द्राङ् निगडमविवेकव्यतिकरम् ।

ष्णालंकारोऽयम् ।

(१८) विष्वगंचतीति विश्वद्रीची सर्वव्यापिनी तया । यस्य विष्णोः । भासा प्रकाशेन । तस्य भासा सर्वमिदं विभातीति श्रुतिः । अहमिति विदामहमित्याकारकज्ञानानाम् । अहंकारप्रत्ययानामिति यावत् । विदित्यत्र संपदादित्वाद् भावे क्विप् । गूढं विवेकेनापि निर्णेतुमशक्यम् । आलंबनमाश्रयः।तत्त्वतो जीवब्रह्मणोरैक्याद्रजतज्ञानाधिष्ठानशुक्तिकावत् सकलाहंकारज्ञानाद्यधिष्ठानं ब्रह्मैवेति भावः ।तं विष्णुमन्यान् पृच्छंतीत्यन्वयः । स्वहृदयमनावेदिनः स्वहृदयमजानानाः । स्वहृदय एव विष्णुर्वर्तत इत्यजानाना इत्यर्थः । शिव शिवेति विषादे । केन वा वर्णनीयो न केनाऽपि वर्णयितुं शक्य इत्यर्थः । अयं विचित्रालंकारः । इष्टसिद्ध्यर्थमिष्टैषिणा क्रियमाणमिष्टाननुकूलाचरणं विचित्रम् । अस्मिन् पद्ये जीवरूपेण सकललोकप्रत्यक्षसिद्धस्य परमेश्वरस्य प्रतिपत्त्यर्थं मुख्यानुकूले स्वहृदये प्रष्टव्ये परान् प्रति प्रश्नोऽनुकूलाभासः ।

(१९) कवेः स्वचित्तं प्रत्युक्तिः । गाथा भगवद्गीतादिरूपा । निरर्गलसुखे निष्प्रतिबंधसुखे । ब्रह्मानंद इत्यर्थः । सुप्यतां विषयांतराद्विरम्य तत्रैव स्थीयताम् ।

(२०) एकदेशविवर्ति सावयवं रूपकमिदम् । अत्र सहचरैर्निगडादिरूपकैः

Digitized by Google

विशुद्धेऽस्मिन्नात्मामृतसरसि नैराश्यशिशिरे
विगाहंते दूरीकृतकलुषजालाः सुकृतिनः ॥ २० ॥
बंधोन्मुक्त्यै खलु मखमुखान् कुर्वते कर्मपाशान्
अंतःशांत्यै मुनिशतमतानल्पचिंतां भजंति ।
तीर्थे मज्जंत्यशुभजलधेः पारमारोढुकामाः
सर्वं ग्रामादिकमिह भवभ्रांतिभाजां नराणाम् ॥ २१ ॥
प्रथमं चुंबितचरणा जंघाजानूरुनाभिहृदयानि ।
आश्लिष्य भावना मे खेलतु विष्णोर्मुखाब्जशोभायाम्॥२२
मलयानिलकालकूटयो
रमणीकुंतलभोगिभोगयोः ।
श्वपचात्मभुवोर्निरंतरा
मम भूयात्परमात्मनि स्थितिः ॥ २३ ॥

सुकृतिषु गजरूपकमाक्षिप्यते । भवः संसार एव प्रौढातपनिवहस्तेन संतप्तं वपुर्येषां ते । निगडं बंधम् । अविवेकव्यतिकरमज्ञानसमूहम् । आत्मैवामृतसरस्तस्मिन् । नैराश्येनाशाराहित्येन शिशिरे शीतले । दूरीकृतं कलुषजालं पापसमूहो यैस्ते ।

(२१) अर्थं विचित्रालंकारः । अत्र भवभ्रांतेर्नरीरिष्टासिद्ध्यर्थं क्रियमाणमिष्टविपरीताचरणं वर्णितम् । अत्र प्रथमतृतीयचरणगतं विचित्रं रूपकानुप्राणितम् । बंधोन्मुक्त्यै संसाररूपबंधमोचनाय । मखमुखान् यज्ञादीन् । अंतःशांत्यै चित्तशांत्यै । मुनिशतमतानामनल्पचिंतामधिकचिंतनम् । अशुभजलधेरमंगलरूपसमुद्रस्य । ग्रामादिकं विवेकशून्यम् । इहास्मिन् जगति । भवभ्रांतिभाजां संसारभ्रांताचित्तानाम् ।

(२२) चुंबितचरणा ध्यातविष्णुपदा । भावना ध्यानवृत्तिविशेषः । खेलतु रमताम् ।

(२३) शांतरसध्वनिरयम् । प्रथमार्धं उत्तमाधमयोरुपक्रमं कृत्वा द्वितीया-

---

23—Omitted in D, E, F.

Digitized by Google

निखिलं जगदेव नश्वरं
पुनरस्मिन्नितरां कलेवरम् ।
अथ तस्य कृते कियानयं
क्रियते हंत जनैः परिश्रमः ॥ २४ ॥
प्रतिपलमखिलाँल्लोकान्मृत्युमुखं प्रविशतो निरीक्ष्यापि ।
हा हंत किमिति चित्तं विरमति नाद्यापि विषयेभ्यः॥ २५॥
सपदि विलयमेतु राज्यलक्ष्मी-
रुपरि पतंत्वथवा कृपाणधाराः ।
अपहरतुतरां शिरः कृतांतो
मम तु मतिर्न मनागपैतु धर्मात् ॥ २६ ॥
अपि बहलदहनजालं मूर्द्धि रिपुर्मे निरंतरं धमतु ।
पातयतु वासिधारामहमणुमात्रं न किंचिदपभाषे ॥ २७॥
तरणोपायमपश्यन्नपि मामक जीव ताम्यसि कुतस्त्वम् ।

र्धेऽधमोत्तमवचनं वक्तुर्ब्रह्मात्मकतयोत्तमाधमज्ञानवैकल्यद्योतनाय । कुंतलाः केशाः । भोगिभोगः सर्पशरीरम् । श्वपचात्मभुवोश्चंडालज्ञानिनोः । निरंतरा तारतम्यशून्या । इदं स्थितेर्विशेषणम् ।

(२४) नश्वरं नाशशीलम् । अस्मिन् जगति । कलेवरं पुनर्नितरां नश्वरमित्यन्वयः । कलेवरं शरीरम् । तस्य कलेवरस्य । हंतेति खेदे ।

(२५) प्रतिपलं प्रतिक्षणम् । प्रसिद्धकारणसत्वेऽपि कार्याभाववर्णनाद्विशेषोक्तिरियम् ।

(२६) एषाऽधर्मेणापि रिपुर्जेतव्य इति वदंतं प्रति कस्यचिद्राज्ञ उक्तिः । कृपाणः खड्गः । कृतांतो यमः। नापैतु न चलतु । धर्मवीरध्वनिरयम् ।

(२७) दुर्भाषणं परिहरतः कस्यचिदुक्तिरियम् । बहलदहनजालं प्रचंडवह्निसमूहम् । धमतु प्रदीपयतु ।

24–27–Omitted in D, E, F.

Digitized by Google

चेतःसरणावस्यां किं नागंता कदापि नंदसुतः ॥ २८ ॥
श्रियो मे मा संतु क्षणमपि च माद्यद्गजघटा-
मदभ्राम्यद्भृंगावलिमधुरझंकारसुभगाः ।
निमग्नानां यासु द्रविणमदिराघूर्णितदृशां
सपर्यासौकर्यं हरिचरणयोरस्तमयते ॥ २९ ॥
किं निशंकं शेषे शेषे वयसः समागतो मृत्युः ।
अथवा सुखं शयीथा निकटे जागर्ति जाह्नवी जननी ॥ ३० ॥
संतापयामि किमहं धावं धावं धरातले हृदयम् ।
अस्ति मम शिरसि सततं नंदकुमारः प्रभुः परमः ॥३१॥
रे रे मनो मम मनोभवशासनस्य
पादांबुजद्वयमनारतमानमंतम् ।

---

(२८) तरणोपायं भवसागरतरणोपायम् । चेतःसरणौ चित्तवृत्तौ । किं नागंता किं नागमिष्यति । नंदसुतस्मरणमेव तरणोपाय इति त्वं चिंतां माकार्षीरिति भावः ।

(२९) श्रियः संपदः । माद्यंती या गजघटा करिव्रजस्तस्या मदेन भ्राम्यंती या भृंगावलिस्तस्या मधुरझंकारैः सुभगाः । यासु श्रीषु । द्रविणमदिराघूर्णितदृशां संपत्तिमद्यसेवनेन भ्रांतदृशाम् । सपर्यासौकर्यमाराधनासुलभत्वम् । अस्तमयते नष्टं भवति । अयं तिरस्कारालंकारः। तिरस्कारश्च दोषविशेषानुबंधाद् गुणत्वेन प्रसिद्धस्यापि द्वेषः ।

(३०) स्वजीवं प्रति कवेरुक्तिः । निःशंकं निर्भयम् । शेषे स्वपिषि । वयसः शेषे वार्धके । केषांचिन्मतेऽयमाक्षेपालंकारः । अप्यदीक्षितस्य पंडितराजं प्रत्युक्तिरियमिति लोकप्रवादः ।

(३१) धावं धावं धावित्वा धावित्वा । अत्र वक्तृगता धृतिर्व्यज्यते ।

(३२) कवेः स्वमनः प्रत्युक्तिः । मनोभवशासनस्य पादांबुजद्वयमानमंतं मां संसृतिगर्तमध्ये किं निपातयसीत्यन्वयः । मनोभवशासनस्य मदनशत्रोः शिवस्य । मनोभवपदप्रयोगेणात्र मदनस्य मनस उत्पत्तिः सू-

Digitized by Google

किं मां निपातयसि संसृतिगर्तमध्ये
नैतावता तव गमिष्यति पुत्रशोकः ॥ ३२ ॥
मरकतमणिमेदिनीधरो वा
तरुणतरस्तरुरेष वा तमालः ।
रघुपतिमवलोक्य तत्र दूरा-
दृषिनिकरैरिति संशयः प्रपेदे ॥ ३३ ॥
तरणितनया किं स्यादेषा न तोयमयी हि सा
मरकतमणिज्योत्स्ना वा स्यान्न सा मधुरा कुतः ।
इति रघुपतेः कायच्छाया विलोकनतत्परै-
रुदितकुतुकैः कैः कैरादौ न संदिदिहे जनैः ॥ ३४ ॥
चपला जलदाच्युता लता वा
तरुमुख्यादिति संशये निमग्नः ।
गुरुनिःश्वसितैः कपिर्मनीषी
निरणैषीदथ तां वियोगिनीति ॥ ३५ ॥

च्यते । अनारतमविरतम् । संसृतिगर्तमध्ये संसारश्वभ्रमध्ये । एतावताऽनेनोपायेन । तव मनसः । पुत्रशोकः स्वपुत्रमदननाशजन्यशोकः । अत्र मदनस्य मनःपुत्रत्वेन कल्पनं तस्य मनःप्रभवत्वात् । अत्र प्रागुक्तः प्रत्यनीकालंकारः ।

(३३) मरकतमणीनां मेदिनीधरो वृक्षः । मरकतो हरिन्मणिः । तत्र दंडकारण्ये । दूरादवलोक्येत्यन्वयः । अयं ससंदेहालंकारः ।

(३४) रघुपतिं पश्यतां दंडकारण्यवासिनां संदेहा अत्र निबद्धाः । अयं निश्चयगर्भः ससंदेहः । तरणितनया यमुना । एषा पुरो दृश्यमाना । रघुपतेः कायच्छाया देहकांतिः । उदितकुतुकैः प्राप्तकुतूहलैः ।

(३५) अयं निश्चयांतः ससंदेहः । चपला विद्युत् । तरुमुख्याच्युता लता वेत्यन्वयः । गुरुनिःश्वसितैर्दीर्घनिःश्वासैः । कपिर्हनूमान् । मनीषी

Digitized by Google

भूतिर्नीचगृहेषु विप्रसदने दारिद्र्यकोलाहलो
नाशो हंत सतामसत्पथजुषामायुः समानां शतम् ।
दुर्नीतिं तव वीक्ष्य कोपदहनज्वालाजटालोऽपि सन्
किं कुर्वे जगदीश यत्पुनरहं दीनो भवानीश्वरः॥ ३६॥
आमूलाद्रत्नसानोर्मलयवलयिताद्या च कूलात्पयोधे-
र्यावंतः संति काव्यप्रणयनपटवस्ते विशंकं वदंतु ।
मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ॥
गिरां देवी वीणागुणरणननहीनादरकरा
यदीयानां वाचाममृतमयमाचामति रसम् ।

चतुरः । निरणैषीन्निश्चिकाय । तां सीताम् । वियोगिनी विरहिणी ।

(३६) भूतिः संपत्तिः । सतां साधूनाम् । असत्पथजुषां दुर्मार्गवर्तिनां खलानाम् । समानां संवत्सराणाम् । कोपदहनज्वालाजटालोऽपि क्रोधाग्निज्वालाव्याप्तोऽपि । अनेनास्मिल्लोके साधूनां सुखं खलानां च दुःखमिति न नियम इति दर्शितम् ।

(३७) अतः परं पंडितराजो ग्रंथमुपसंहरन्नात्मानमुद्दिश्य ब्रवीति । रत्नसानोः सुमेरोरामूलान्मूलमभिव्याप्य । मलयवलयितान्मलयपर्वतवेष्टितात् । कूलात्तीरात् । पयोधेर्दक्षिणं तीरं मलयवलयितामिति प्रसिद्धमेव । कूलादा कूलमभिव्याप्य । अखिले भारतवर्ष इति चरणतात्पर्यम् । काव्यप्रणयनपटवः काव्यनिर्माणकुशलाः । विशंकं निर्भयम् । न तान् वारयाम इति भावः । मृद्वीकाया द्राक्षाया मध्यान्निर्यती निःसरंती या रसझरी रसप्रवाहस्तस्या माधुर्या भाग्यं भजंति तासाम् । आचार्यता दीक्षाकर्तृता । अत्र स्वकवित्वप्रयुक्तात्मोत्कर्षज्ञानजन्यः पंडितराजगतो गर्वो व्यंग्यः ।

(३८) गिरां देवी सरस्वती । वीणाया गुणरणने तंत्रीशब्दकर्मणि हीनादरः करो हस्तो यस्याः सा । आचामति पिबति । आस्वादयतीति

Digitized by Google

वचस्तस्याकर्ण्य श्रवणसुभगं पंडितपते-
रधुन्वन्मूर्धानं नृपशुरथवायं पशुपतिः ॥ ३८ ॥
मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित्केषांचिन्न खलु विदधीरन्नपि मुदम् ।
ध्रुवं ते जीवंतोऽप्यहह मृतका मंदमतयो
न येषामानंदं जनयति जगन्नाथभणितिः ॥ ३९ ॥
निर्माणे यदि मार्मिकोऽसि नितरामत्यंतपाकद्रवन्-
मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नो चेद्दुष्कृतमात्मना कृतमिव स्वांताद्बहिर्मा कृथाः॥४०॥
महाणि मा कुरु विषादमनादरेण
मात्सर्यमग्नमनसां सहसा खलानाम् ।

यावत् । श्रवणसुभगं कर्णमधुरम् । पंडितपतेः पंडितराजजगन्नाथस्य । अधुन्वन्नचालयन् । नृपशुर्नरो भूत्वा पशुतुल्यः । पशुपतिः शिवः । तद्वद्विरक्त इति भावः । पंडितपतेर्वचांस्याकर्ण्य यस्य चित्तं न द्रवते स मुक्तोऽथ वा पशुरिति तात्पर्यार्थः ।

(३९) अथ च । वामाधरसुधा कांताधरामृतम् । न विदधीरन्न कुर्युः । मुदमानंदम् । ध्रुवं निश्चयेन । अहहेत्यनुकंपायाम् । मृतका मृततुल्या इत्यर्थः ।

(४०) पंडितराजस्यान्यं कंचित् कविं प्रत्युक्तिः । अत्यंतपाकेन द्रवद् यन्मृद्वीकामधु तस्य माधुरीमदस्य परीहार उद्धुराणां समर्थानाम् । दुष्कृतं पापम् । मत्कृतकाव्यतुल्यमन्यत् काव्यं नास्तीति कवेराशयः ।

(४१) खलानामनादरेण विषादं मा कुर्वित्यन्वयः । काव्यारविंदमकरंदमधुव्रतानां काव्यकमलमकरंदस्य सेवने भ्रमरभूतानां सहृदयानाम् । आस्येषु मुखेषु । धास्यसि धारयिष्यसि । रसिकास्त्वामासाद्य धन्य-

Digitized by Google

काव्यारविंदमकरंदमधुव्रताना-
मास्येषु धास्यसितमां कियतो विलासान् ॥ ४१ ॥
विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन् वाचां विपाको मम ॥४२ ॥
धुर्यैरपि माधुर्यैर्द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम् ।
वंद्यैव माधुरीयं पंडितराजस्य कवितायाः ॥ ४३ ॥
शास्त्राण्याकलितानि नित्यविधयः सर्वेऽपि संभाविता
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
संप्रत्युज्झितवासनं मधुपुरीमध्ये हरिः सेव्यते
सर्वं पंडितराजराजितिलकेनाकारि लोकाधिकम्॥४४॥

वादान् करिष्यंत्येवेति भावः ।

(४२) वाचंयमा मूकाः । कमलाविलासरूपा या मदिरा तयोन्मीलन्नुत्पद्यमानो यो मदस्तेनाघूर्णिता भ्रांताः । कस्य धन्यस्यास्य इत्यन्वयः । लास्यं नृत्यम् । कामालसानां स्वर्वामानामप्सरसामधरमाधुरीम् । अधरयंस्तिरस्कुर्वन् । वाचां विपाको वाक्प्रौढिः । इदं पद्यं पंडितराजकृतप्राणाभरणकाव्यस्यारंभेऽपि दृश्यते । तत्र स्वव्याख्यायां पंडितराजेनैवोक्तम् । विद्वांस इत्यादि प्रायदर्शनाभिप्रायमेतत् । तेन सहृदयैर्न मनागपि विमनायितव्यमिति ।

(४३) धुर्यैः श्रेष्ठैः । माक्षिकं मधु ।

(४४) आकलितानि सम्यगधीतानि । नित्यविधयः संध्यावंदनादयः । संभाविताः कृताः । दिल्लीवल्लभपाणिपल्लवतले शहाजहाननामकदिल्लीपतिकरतले । तदाश्रयेण तत्प्रसादेन चेत्यर्थः । नवीनं वयस्तारुण्यम् ।

42—Omitted in D, E, F; 44—Omitted in D, F.

Digitized by Google

दुर्वृत्ता जारजन्मानो हरिष्यंतीति शंकया ।
मदीयपद्यरत्नानां मंजूषैषा कृता मया ॥ ४५ ॥
इति श्रीपंडितराजजगन्नाथनिर्मिते भामिनीविलासे
शांतविलासः ।

समाप्तोऽयं ग्रंथः ।

ज्ञज्ञितवासनं त्यक्ताविषयाभिलाषम् । मधुपुरी " मथुरा " इति ख्याता नगरी । पंडितराजराजितिलकेन पंडितराजश्रेणीमुख्येन । अत्र " ई " संज्ञितपुस्तके तृतीयचरणे "संप्रत्यंधकशासनस्य नगरे तत्त्वं परं चिंत्यते " इति पाठांतरं दृश्यते । तत्रांधकशासनस्य शिवस्य नगरं "काशी" इति प्रसिद्धमिति बोद्धव्यम् ।

(४५) दुर्वृत्ता दुराचाराः । जारजन्मानोऽन्यास्त्रियामन्यजाताः । हरिष्यंति स्वकृतत्वेन ख्यापयिष्यंति । मंजूषा पेटिका । एषा भामिनीविलासरूपा ।

इति भामिनीविलासव्याख्यायां काव्यमर्मप्रकाशाख्यायां
शांतविलासः ।

Digitized by Google

APPENDIX.

परिशिष्टम्।

१ प्रास्ताविकविलासः।

दृढप्रेमा भग्नः सदसिरिव संधिं न लभते
लभेताभिप्रायः स्खलति बहुयत्नैरपि धृतः।
स्खलेन्नोचेत्साम्यं न भजति भजेद्वा न पवति(?)
च्युतं संगच्छेत स्मृतिमुपगतस्तु व्यथयति ॥ ९३ ॥
कातराः परदुःखेषु निजदुःखेष्वकातराः।
अर्थेष्वलोभा यशसि सलोभाः संति साधवः ॥ ७३ ॥
विद्वत्सु विमलज्ञाना विरक्ता यतिषु स्थिताः।
स्त्रीयेषु तु गरोद्गारा नराकाराः क्षितौ खलाः ॥ ७४ ॥

२ शृंगारविलासः।

दर्पणे च परिभोगदर्शिनी दृष्टतः प्रणयिनो निषेदुषः।
वीक्ष्य बिंबमनु बिंबमात्मनः कानि कान्यपि चकार लज्जया ॥ ११३ ॥

४ शांतविलासः।

सुरस्रोतस्विन्याः पुलिनमधितिष्ठन्नयनयो-
र्विधायांतर्मुद्रामथ सपदि विद्राव्य विषयान्।
विधूतांतर्ध्वांतो मधुरमधुराथां चिति कदा
निमग्नः स्यां कस्यांचन नवनमस्यांबुदरुचि ॥ १३ ॥

I. 53, 73, 74—Found in D, only.

II. 113—Though found in three of our copies, this stanza occurs in the *Rasagangádhara* merely as part of a quotation from Appadikshita's *Chitramimánsá*, not as Jagannátha's own. (See *Rasagangádhara* and *Chitramimánsá* under *Sasandeha.*) It is originally taken from Kálidása's *Kumárasambhava* (*VIII.* 11)

IV. 13—This stanza occurs in A,B and C; but Jagannátha declares in the *Rasagangádhara* that it belongs to his *Karunálahari*. (इदं च पद्यं मन्निर्मितायां भगवद्भक्तिप्रधानायां करुणालहर्यामुपनिबद्धमिति तत्प्रधानभावप्राधान्यमेवार्हति। *R. G., Anana. I*)

Digitized by Google

INDEX.

पद्यसूची.

पद्यादिः	विला	पद्यम्	पृ०	पद्यादिः	विला	पद्यम्	पृ०
अकरुण मृषा–	२	२१	४०	अव्याख्येयां	४	१६	९८
अकरुणहृदय	२	४१	४६	आगतः पतिः	२	१५	३८
अंकायमानमलिके	२	९९	६३	आनंदमृगदावाग्निः	१	१०९	२८
अंगानि दत्वा	२	१७३	८३	आननं मृगशावाक्ष्या	२	१३१	७१
अंगैः सुकुमारतरैः	२	१६३	८०	आनम्य वल्गु–	२	१३६	७२
अद्वितीयं रुचा	२	१०४	६४	आपन्नतः किल	१	७०	१७
अधरद्युतिरस्तपल्लवा	२	८३	५९	आपेदिरेऽवरपथं	१	१७	५
अधरेण समागमात्	२	१८०	८५	आमूलाद्रत्नसानोः	४	३७	१०४
अधिरजनि प्रियसविधे	२	५३	४९	आयातैवनिशानिशापति	२	५६	५०
आधिरोप्य हरस्य	२	३८	४५	आयातैव निशा मनः	२	७४	५५
अनवरतपरोपकार–	१	१२३	३०	आरामाधिपतिः	१	३१	८
अनिशं नयना–	२	१६२	८०	आलिंगितो जलधि–	४	८	९५
अन्या जगद्भितमयी	१	६९	१७	आलीषु केली–	२	१२	३७
अपनीतपरिमलांतर–	१	२२	६	आलोक्य सुंदरि	२	८९	६०
अपारे संसारे	४	७	९५	आविर्भूता यदवधि	२	७९	५७
आपि बहल–	४	२७	१०१	आसायं सलिलांतः	२	१४९	७६
अभूदप्रत्यूहः	२	१३७	७३	इत एव निजालयम्	२	२७	४२
अमरतरुकुसुम–	१	२८	७	इदमप्रतिमं	२	८७	६०
अमितगुणोऽपि	१	८१	२१	इदं लताभिः	२	१०८	६५
अयाचितः सुखं	१	१२७	३२	इयत्यां संपत्तावापि	१	४३	११
आयि दलदरविंद	१	५	३	इयमुल्लसिता	२	१४८	७६
अयि बत गुरुगर्व	१	१२१	३०	उत्तमानामापि	१	१२६	३१
अयि मंदस्मितमधुरं	२	१५०	७७	उदितं मंडलमिंदोः	२	८५	५९
अयि मलयज	१	११	४	उपकारमेव तनुते	१	८२	२१
आयि रोषमुरीकरोषि	१	४४	११	उपनिषदः परिपीताः	२	४०	४६
अये जलधिनंदनो–	४	२	९३	उपरि करवालधारा–	१	१४	५
अरुणमपि	२	१७०	८२	उषसि प्रातिपक्ष–	२	६४	५२
अलकाः फणिशाव–	२	१६०	७९	एकस्त्वं गहने	१	२५	७
अलंकर्तुं कर्णौ	२	५५	४९	एको विश्वसतां	१	६७	१६
अलिमृगो वा	२	९३	६२	एणीगणेषु गुरु–	१	४९	१२
अवधौ दिवसा–	२	१६	३८	एष कुसुमाकरो	१	११४	२९
अविचिंत्यशक्ति–	२	११०	६६	औत्सुक्यात्परिमिलताम्	२	४५	४७
अविरतं परकार्य–	१	११३	२८	औदार्यं भुवनत्रयेऽपि	१	६६	१६

Digitized by Google

कथय कथमिवाशा	२	२८	४२	गीरिगव्हरेषु	१	५३	१३
कनकद्रव-	२	११६	६७	गीर्भिर्गुरूणां	१	७३	१८
कपोलपालि	२	१०	३६	ग्रीष्मचंडकर-	४	६	९५
कपोलावुन्मीलत्-	२	७७	५७	ग्रीष्मे भीष्मतरैः	१	३५	९
कमलिनि मलिनी-	१	८	३	गुंजति मंजु मिलिंदे	१	१९	६
कर्पूरवर्तिरिव	३	१६	९१	गुंजंति मंजु परितः	२	१५४	७८
करिकुंभतुलाम्	२	१७७	८४	गुरुजनभय-	२	७	३५
कलभ तवांतिकम्	१	२७	७	गुरुभिः परि-	२	१८	३९
कलिंदगिरिनंदिनी-	४	४	९४	गुरुमध्यगता	२	१९	३९
कलिंदजानीरभरे	२	१२०	६८	गुरुमध्ये हरिणाक्षी	२	४९	४८
कस्तूरिकातिलकम्	२	४	३४	चपला जलदात्	४	३५	१०३
कस्मै हंत फलाय	१	१०३	२६	चलद्भृंगमिवांभोजम्	२	१०१	६४
कांत्या सुवर्णवरया	३	१५	९१	चिंतामीलितमानसो	२	५४	४९
कालागुरुद्रवं	२	६९	५४	चिंता शशाम	३	७	८८
काव्यात्मना	३	१०	८९	चेलांचलेन	२	१७९	८५
किं खलु रत्नैरेतैः	१	४२	१०	जगज्जालम्	४	५	९४
किं जल्पसि मुग्धतया	२	४४	४७	जगदंतरम्	२	१२७	७०
किं तीर्थे हरिपाद-	१	८६	२२	जठरज्वलन-	१	५०	१२
किं निःशंकं शेषे	४	३०	१०२	जनकः सानुविशेषो	१	१०२	२६
किमहं वदामि	१	१०७	२७	जनमोहकरम्	२	१२२	६९
किमिति कृशासि	२	१४६	७६	जंबीरश्रियम्	२	९	३६
कुचकलशयुगांतः	२	३२	४३	जलकुंभम्	२	१४४	७५
कृतमपि महोपकारं	१	७६	१९	जितमौक्तिक-	२	१७४	८३
कृतं त्वयोन्नतं	१	११२	२८	तटिनि चिराय	१	२३	६
केनापि मे	३	९	८९	तत्वं किमपि	१	११७	२९
केलीमंदिरम्	२	१६६	८१	तदवधि कुशली	२	१४	३७
कैशोरे वयसि	२	८१	५८	तन्मंजु मंदहसितं	२	५	३४
क्षमापणैकपदयोः	२	६५	५३	तया तिलोत्तमीयंत्या	२	९८	६३
खंडितानेत्रकंजालि-	१	१२९	३२	तरणितनया	४	३४	१०३
खलः कापट्यदोषेण	१	७८	१९	तरणोपायम्	४	२८	१०१
खलः सज्जनकार्पास-	१	९१	२३	तरुकुलसुषमा-	१	२६	७
खलास्तु कुशलाः	१	११०	२८	तावत्कोकिल	१	७	३
खिद्यति सा पथि	२	१६४	८०	तिमिरशारद-	२	१२८	७०
गणिकाजामिलमुख्यान्	४	१२	९६	तिमिरं हरंति	२	३१	४३
गर्जितमाकर्ण्य	१	१०६	२७	तीरे तरुण्याः	२	२२	४०
गरिमाणमपीयित्वा	२	४६	४७	तुलामनालोक्य	२	१४७	७६
गाहितमखिलं	१	२१	६	तृष्णालोलविलोचने	१	४	३
गिरयो गुरवः	१	९७	२५	तोयैरल्पैरपि	१	३०	७
गिरां देवीं वीणा-	४	३८	१०४	त्वमिव पथिकः	२	१४५	७५

Digitized by Google

दधानः प्रेमाणं	१	३३	८	निरूप्य यातीं	२	३०	४२
दंतांशुकांतम्	२	१५८	७९	निष्णातोऽपि च	१	८७	२२
दयितस्य गुणान्	३	१८	९२	निसर्गादारामे	१	५४	१३
दायिते रदनत्विषां	२	९७	६३	निस्सीमशोभा–	२	४८	४८
दारुनमत्कंधर–	२	२४	४१	नीरक्षीरविवेके	१	१३	४
दवदहनजटाल–	१	३६	९	नीरान्निर्मलतः	१	६३	१६
दारिद्र्यं भजते	२	७२	५५	नीलांचलेन	२	१०५	६५
दिगंते श्रूयंते	१	२	२	नीवीं नियम्य	२	११	३६
दिवानिशम्	२	१२३	६९	नेत्राभिरामं	२	११५	६७
दीनानामिह परिहाय	१	९६	२५	नैर्गुण्यमेव	१	८८	२३
दुर्वृत्ता जारजन्मानः	४	४५	१०६	न्यंचाति वयासि	२	४७	४७
दूरीकरोति कुमतिं	१	१२२	३०	पंकैर्विना सरः	१	११६	२९
दैवं परावदन–	३	१	८७	पत्रफलपुष्पलक्ष्म्या	१	२४	६
दोर्दंडद्वयकुंडली–	१	१२८	३२	परगुह्यगुप्तिनिपुणं	१	९२	२४
धत्ते भरं कुसुम–	१	९४	२४	परपूरुष–	२	१७२	८३
धीरध्वनिभिरलं	१	६१	१५	परस्परासंगसुखात्	२	१२१	६८
धुर्यैरापि माधुर्यैः	४	४३	१०७	परार्थव्यासंगात्	१	७९	२०
धृत्वा पदस्खलन–	३	५	८८	परिष्वजन्	२	१७४	८४
धूमायिता दशदिशः	१	१०४	२६	परोपसर्पणानंत–	१	८९	२३
न मनागपि	२	१	३३	पाटोर तव पटीयान्	१	१२	४
न मिश्रयति	२	१४०	७४	पाटीरद्रुभुजंग–	२	७३	५५
नयनांचलावमर्शं	२	५०	४८	पाणौ कृतः	२	१६९	८२
नयनानि वहंतु	२	१३३	७२	पांडित्यं परिहस्य	१	७७	१९
न यत्र स्थेमानं	१	३२	८	पातालं व्रज	४	११	९६
नयनानंदसंदोह–	४	९	९६	पांथ मंदमते	२	११२	६६
न वारयामो भवतीं	१	४५	११	पापं हंत मया	२	६३	५२
नापेक्षा न च दाक्षिण्यं	१	३९	१०	पिब स्तन्यं पोत	१	६०	१५
निखिलं जगदेव	४	२४	१०१	पुरा सरसि मानसे	१	३	२
निखिलां रजनीं	२	५९	५१	पुरो गीर्वाणानां	१	८४	२१
नितरां नीचोऽस्मीति	१	९	४	पृष्टाः खलु परपुष्टाः	१	२९	७
नितरां परुषा	२	२	३३	पौलोमीपतिकानने	१	४६	११
निधिं लावण्यानां	२	१२५	६९	प्रतिपलमखिलान्	४	२५	१०१
निपतद्बाष्प–	२	६०	५१	प्रत्युद्गता	३	२	८७
निभाल्य भूयः	२	१७६	८४	प्रथमं चुंबितचरणा	४	२२	१०२
निर्गुणः शोभते	१	११५	९	प्रभातसमयप्रभां	२	७५	५६
निर्दूषणा गुणवती	३	६	८८	प्रभुरपि याचितुकामः	२	१४३	७५
निर्माणे यदि	४	४०	१०५	प्रसंगे गोपानां	२	८०	५८
निर्वाणमंगलपदम्	३	४	८७	प्राणापहरणेन	२	२९	४२
निर्वासयंतीं	२	६६	५३	प्रातस्तरां प्रणमने	२	६	३५

Digitized by Google

प्रादुर्भवति पयोदे	२	८६	६०	यदवधि विलास–	२	१३९	७४
प्रारंभे कुसुमाकरस्य	१	४८	१२	यादे लक्ष्मण सा	२	६१	५१
प्रिये विषादं	२	१२९	७१	यास्मिन् वेल्लति	१	५५	१४
बंधोन्मुक्त्यै	४	२१	१००	या तावकीन–	३	११	९०
बदरामलका–	२	८	३५	याते मय्यचिरात्	१	१६	५
भवग्रीष्म–	४	२०	९९	यांती गुरुजनैः	२	१३२	७१
भवनं करुणावती	२	६२	५२	युक्तं सभायां	१	८५	२२
भिन्ना महागिरिशिलाः	१	१०५	२७	येन भिन्नकरिकुंभ–	१	५१	१२
भुजपंजरे	२	३९	४५	येनामंदमरंदे	१	१०	४
भुक्ता मृणालपटली	१	४७	१२	यैस्त्वं गुणगणवान्	१	२०	६
भूतिर्नीचगृहेषु	४	३६	१०४	यौवनोद्गम–	२	३७	४५
भूमौ स्थिता	३	१३	९०	राजानं जनयांबभूव	२	७८	७५
मथुरागमनोन्मुखे	२	१६५	८१	राज्ञो मत्प्रतिकूलात्	२	६७	९५
मद्राणि मा कुरु	४	४१	१०५	राज्याभिषेकमाज्ञाय	२	१३०	९३
मधु द्राक्षा	४	३९	१०५	रीतिं गिराम्	३	१९	६१
मधुप इव मारुते	१	१८	६	रूपजला चलनयना	२	९५	२२
मधुरतरं	२	१५१	७७	रूपारुचिं	२	४३	६
मधुरसान्मधुरं	२	१५२	७७	रे खल तव खलु	१	१०८	४
मंदस्मितेन	३	१२	९०	रे चांचल्यजुषः	१	५९	१५२
मरकतमणि–	४	३३	१०३	रे चेतः कथयामि	४	१५	९८७
मलयानिलम्	२	६८	५४	रे रे मनो मम	४	३२	१०२
मलयानिलकालकूटयोः	४	२३	१००	रोषावेशान्निर्गतं	२	२५	४१
मलिनेऽपि रागपूर्णो	१	१००	२५	लभ्येत पुण्यैः	२	१४२	७४
माधुर्यपरमसीमा	१	१	१	लवलीं तव	२	३६	४४
मानपराग्वदना	२	५१	४८	लावण्यमुज्वलम्	३	१४	९१
मांथर्यमाप	२	१६७	८१	लीलामुकुलित–	१	६४	१६
मीनवती नयनाभ्याम्	२	१११	६६	लीलालुंठितशारदा–	१	७२	१८
मुंचसि नाद्यापि रुषं	२	८८	६०	लूनं मत्तगजै–	१	५६	१४
मुधैव मंतुं	२	१३	३७	लोचनफुल्लांभोज–	२	५२	४८
मुहुरर्थितयाद्य	२	३४	४४	लोभाद्वराटिकानां	२	४२	४६
मूलं स्थूलमतीव	१	३४	८	लोलालकावलि–	२	१५७	७८
मृणालमंदानिल–	२	१३४	७२	वक्षोजाग्रं	२	१७	३८
मृतस्य लिप्सा	१	१२५	३१	वज्रं पापमहीभृतां	४	१४	९७
मृद्वीका रसिता	४	१३	९७	वडवानल–	२	१४१	७४
यशःसौरभ्यलशुनः	१	९३	२४	वदनकमलेन	२	११९	६८
यथा तानं विना रागः	१	११९	३०	वदनारविंद–	२	१८३	८६
यथा यथा	२	१५५	७८	वदने तव यत्र	२	१६१	७९
यथा लतायाः	२	१०७	६५	वदने विनिवेशिता	१	१११	२८
यदवधि दयितः	२	५८	५०	वनांते खेलंती	१	८३	१२

Digitized by Google

वनितेति	२	११७	६८	श्रुतिशतमपि	२	३५	४४
वंशभवो गुणवानपि	१	८०	२०	संग्रामांगण–	३	९१	६१
वहति विषधरान्	१	७४	१८	सत्पूरुषः खलु	१	७५	१९
वाचा निर्मलया	४	१०	९६	संतः स्वतः प्रकाशंते	१	१२०	३०
वाचों मांगलिकीः	२	५७	५०	संतापयामि	४	३१	१०२
विदुषां वदनात्	१	६५	१६	संत्येवास्मिन्	४	१७	९८
विद्वांसो वसुधातले	४	४२	१०६	सपदि विलयमेतु	४	२६	१०१
विदूरादाश्चर्य–	२	७६	५६	सपल्लवा किम्	२	११०	६७
विधाय सा	२	३३	४३	समुपागतवति	१	६	३
विधिवंचितया	२	७०	५४	समुत्पत्तिः स्वच्छे	१	४०	१०
विनये नयना–	२	२०	३९	संपश्यतां	२	११३	६७
विनैव शस्त्रम्	२	१३८	७३	सरजस्कां पांडुवर्णा	१	११८	२९
विबोधयन्	२	१३५	७२	सरसिरुहोदर–	२	१८१	८६
वियोगवन्हिकुंडे	२	१२४	९६	सर्वेऽपि विस्मृतिपथं	३	३	८७
विरहेण विकल–	२	७१	५४	साकं प्रावगणैः	१	४१	१०
विलसत्याननं	२	१७५	८४	सानुकंपाः	२	१५९	७९
विशालविषया–	४	१	९३	सा मदागमन–	२	१०९	६६
विश्वाभिराम–	१	७१	१७	सुदृशो जित–	२	१७१	८२
विश्वास्य मधुर–	१	६८	१७	सुविरलमौक्तिकतारे	२	९४	६२
विष्वद्रीच्या	४	१८	९८	सेवायां यादि	४	१९	९९
वीक्ष्य वक्षसि	२	२३	४०	सौदामिनी–	३	८	८९
वेतंडगंडकंडूति–	१	६२	१५	सौरभ्यं भुवनत्रये	१	३८	१०
व्यत्यस्तं लपति	२	८४	५९	स्तनाभोगे	२	१०६	६५
व्यागुंजन्मधुकर-	१	१२४	३१	स्तनांतर्गत–	२	१२६	७०
व्योमनि बीजाकुरुते	१	९८	२५	स्थितिं नो रे दध्याः	१	५२	१३
शतकोटिकठिन-	२	१०२	६४	स्मयमाननानां	२	११८	६८
शतेनोपायानां	२	१५३	७७	स्मितं नैतत्किं तु	२	९०	६१
शयिता सविधे	२	१८२	८६	स्मृतापि तरुणातपं	४	३	९३
शयिता शैवलशयने	२	८२	५९	स्वच्छंदं दलदरविंद	१	१५	५
शास्त्राण्याकलितानि	४	४४	१०६	स्वप्नांतरेऽपि	२	१७	९१
शिशिरेण यथा सरोरुहं	२	१००	६४	स्वलोकस्य शिखामणिः	१	५७	१४
शून्येऽपि	१	९०	२३	स्वस्वव्यापृति–	१	५८	१४
शृण्वन् पुरः	१	३७	९	स्वार्थं धनानि	१	१०१	२५
शोणाधरांशु–	२	९६	६२	स्वेदांबुसांद्रकण–	२	३	३४
श्यामलेनांकितं	२	१०३	६४	हरिणीप्रेक्षणा	२	१५६	७८
श्यामं सितं च	२	९२	६१	हारं वक्षसि	१	९९	२५
श्वासोऽनुमानवेद्यः	२	१६८	८२	हालाहलं खलु	१	९५	४२
श्रियो मे मा संतु	४	२९	१०२	हृदये कृतशैवला-	२	२६	२४

Digitized by Google

Corrections.

९. १२. जीवन्मे (जविनो) ११. २१. मधुव्रतो (मव्रतो) १८. ६. महत्वम् (महत्वम्) २१. ११. संमुखयतः (संमखयतः) २४. ६. धर्मव्यथां (घर्मव्यथा) ३४. २२. दर्शयंत्विति (दशयंत्विति) ३६. ३. आतिलंघ्य (अतिलंघ्य) ३६. १४. निभा (निभां) ३६. २३. दिक्पक्षे (दिक्पक्ष) ३७. १७. ०लपंत्य०(०लपत्यं०)४२. १५. अनुषंगः (अंनुषंगः)४३.२. मंदमंदं(मंदमदं)४५. १. परिपांडुर० (परिपाडुर०) ४७. ६. यूनां(यूंनां)४८. १२. चंचलम् (चचंलम्) ५१. १३. ०अर्थ० (०अथ०)५४. १. अनलीयति (अनलयिति) ६१. ६. ०विवरोन्मीलन् (०विवरोन्मलिन्) ६३. १९. ०चंद्र०(०चद्र०)६४. १७. लङ् (लुग्)६५.११. वन्नंतरालम्(वनातरालम्)६६. foot-note. add:–109–omitted in C. E. F. 72. 25. ०द्यतस्या०(०तद्यस्य०)८६. १९. भ्रमर०(भ्रमर०) ८८. १७ अवलंब्य (अवलब्यं) ८८. २२. ०रसैर्मिश्रिता० (०रसैःश्रिता) ९१. २२. ०माला (०माल) ९२. १६. विरोधस्य (विरोधस्य) १०८. २०. found (fouud).

*** A few minor errors have been omitted in this list.

Digitized by Google


Digitized by Google